न्यासः, वशिन्यादिन्यासः, पीठचतुष्टयन्यासः, तत्त्वन्यासः)

Page क्षिव्

न्यासपद्धतिः (घ. ङ्ग. मातृकयोर्धृता)..... 52-55
(करशुद्धिन्यासः, आसनषडङ्गन्यासः, भूतशुद्धिः, कराङ्गन्यासः,
मातृकान्यासः, षडङ्गन्यासः, अक्षरन्यासः, पीठन्यासः,
कामकलान्यासः, आयुधन्यासः)
ध्यानपद्धतिः ..... 56-61
(स्थूलसूक्ष्मपरभेदेन त्रिविधं ध्यानम्, वाग्भवादिबीजसाधनप्रकारः,
वाग्भवादिबीजध्यानम्)
पूजापद्धतिः (अत्र भिन्नाक्षरेषु ग। घङ्ग। पाठः)..... 62-103
(दूतीयागः, कुण्डगोलोद्भवार्घ्यसङ्ग्रहः, द्वारदेवताद्वारपालादिपूजा,
मूलदेव्याराधनम्, षोडशनित्यापूजनम्, नवावरणाङ्गदेवतापूजनम्,
नवनित्यायजनम्, मण्डलचतुष्टये बटुकादिपूजनम्,
बटुकादिबलिमन्त्राः, बौद्धादिषड्दर्शनदेवताराधनम्,
कामकलाध्यानम्, कुमारीबटुकपूजनम्, योगिनां अन्तःपूजा)
मुद्रापद्धतिः ..... 104
होमपद्धतिः ..... 105-110
(कुण्डसाधनम्, कुण्डादिसंस्कारः, अग्न्याराधनम्, नित्यकाम्य-
पुरष्चरणीयहोमद्रव्याणि, आन्तरहोमः)
जपपद्धतिः (त्रिविधो जपः)..... 111
अक्षमालापद्धतिः (बाह्याभ्यन्तराक्षमालालक्षणम्)..... 112-113
स्तोत्रपद्धतिः ..... 114-123
(त्रिपुरसुन्दरीदण्डकम्, सौभाग्यहृदयस्तोत्रम्)
पवित्रपद्धतिः ..... 124-130
दमनकपद्धतिः ..... 132-136
काम्यपद्धतिः ..... 137-139
दीक्षापद्धतिः ..... 140-167
(बीजाष्टकोद्धारः, आणवीया शाक्तेयी शाम्भवी च दीक्षा,
वेधादीक्षा, चतुष्षष्टियोगिनीबीजानि, चतुष्षष्टियोगिनी-
पूजनम्, गुरुपारम्पर्यक्रमः, दिव्यौघसिद्धौघमानवौघपरम्परा)

Page क्ष्व्

ग्रन्थसमाप्तिः ..... 168
प्रथमं परिशिष्टं
काम्यपद्धतिदीक्षापद्धत्योरन्तरा विद्यमानाः क. श्लोकाः ..... 169
५४ ख.-५६ क. पर्यन्तं विद्यमानाः क. श्लोकाः ..... 170-172
५० क.-५१ ख. पर्यन्तं विद्यमाना योगिनीनामावली ..... 173
द्वितीयं परिशिष्टं
मण्डपवर्णनं ..... 174-176
तृतीयं परिशिष्टं
मन्त्रोद्धारपद्धतिः ..... 177-208
(वर्णन्यासाहितो वर्णगह्वरः, करशुद्धि-आत्मरक्षाकरी-आत्मासन-चक्रासन-सर्वमन्त्रासन-साध्यसिद्धासन-आवाहनादिनवनित्या-मन्त्रोद्धारः, पञ्चदशतिथिनित्यामन्त्रोद्धारः, समयविद्योद्धारः, मुद्राबीजसमुद्धारः, चतुराम्नायविद्योद्धारः, समयमन्त्रसमुद्धारः, षड्दर्शनविद्योद्धारः)
चतुर्थं परिशिष्टं
न्यासपद्धतिः ..... 209-242
(कुङ्कुमन्यासः, भूतलिपिन्यासः, विघ्नरतिन्यासः, कामरतिन्यासः, श्रीकण्ठादिन्यासः, गणेशन्यासः, ग्रहन्यासः, नक्षत्रन्यासः, योगिनीन्यासः, राशिन्यासः, पीठन्यासः, चक्रन्यासः, पुर्यष्टकन्यासः, तत्त्वन्यासः, चक्रन्याससमहिमा, चतुर्विधो न्यासः, कामीन्यासः, नवयोनिन्यासः, आन्तरन्यासः)
पञ्चमं परिशिष्टं
पीठार्चनपद्धतिः सामान्यार्घ्यपात्राणि च ..... 243-249
(पीठार्चनम्, कुम्भसंस्कारविधिः, सामान्यार्घ्यपात्रस्थापनविधिः, गुरुङ्क्तितर्पणम्, षडायतनपूजा, षड्योगिनीपूजा, चतुष्पीठपूजा)
षष्ठं परिशिष्टं
स्तोत्रपद्धतिः ..... 250-259

Page क्षिव

सप्तमं परिशिष्टं
द्वीपाम्नायपद्धतिः ..... 260-276
अष्टमं परिशिष्टं

त्रिपुरास्तोत्रं ध्यानं च ..... 277-282
अनुक्रमण्यः (The following sections are not included)
ग्रन्था ग्रन्थकाराश्च ..... 283-285
सङ्केतसूची ..... 286-287
श्लोकार्धसूची ..... 288-332
न्यासविस्तरः (मूलग्रन्थे)..... 333
न्यासविस्तरः (परिशिष्टे)..... 334
मातृकासूद्धृताः पद्धतयः ..... 335-336

Page 1

ॐ नमो भगवते वासुदेवाय ।

## गुरुध्यानपद्धतिः

स्वप्रकाशविमर्शाख्यां बीजाङ्कुरलतां पराम् ।
शृङ्गाटपीठनिलयां वन्दे त्रिपुरसुन्दरीम् ॥

विमर्शैक्रसासारामाद्यबीजस्य गर्भगाम् ।
कलां सप्तदशीं वन्दे त्रिपुरां त्रिपुरातनीम् ॥

त्रित्रिभेदत्रिनिलयां बिन्दुस्फुटनसम्भवाम् ।
हकारार्धकलां वन्दे पूर्णां त्रिपुरसुन्दरीम् ॥

पूर्णादिप्रथमान्तां यां त्रिपञ्चतिथिगामिनाम् ।
तां कलारूपिणीं नित्यां वन्दे कालापहारिणीम् ॥

दग्ध्वा पाशाटवीं सर्वां शार्वं धाम समर्पयेत् ।
यदाज्ञा तानहं वन्दे गुरून् कारुण्यवारिधीन् ॥

निहत्य विघ्नसङ्घातमष्टमाशु तनोति यः ।
तमहं शाम्भवीसूनुं वन्दे तं गणनायकम् ॥

द्वैताद्वैतमहामोहविघ्नसङ्घातमर्दिनीम् ।
गणनाथमयीं वन्दे प्रतिभां पारमेश्वरीम् ॥

Page 2

अपरां चित्क्रियारूपामानन्दभरनिर्भराम् ।
बटुकाख्यामहं वन्दे ह्याम्बिकेयीं कलां पराम् ॥

रसवेदमया देव्यो रथाङ्गनिलयाः सदा ।
स्वसंविद्विप्रुषो नौमि योगिनीः कालमोचिकाः ॥

शिवाद्यवनिपर्यन्तं क्षेत्रं सत्पालयत्यलम् ।
क्षेत्रपालमयीं वन्दे प्रतिभां शाम्भवीमजाम् ॥

श्रीवामकेश्वराम्नायमुन्नियागमसागरात् ।
प्रपन्नजनताबोधध्वान्तविच्छेदभानुना ॥

क्रियते पद्धतिः सम्यग् विद्यानन्देन धीमता ।
नित्यं नैमित्तकं यत्र काम्यं दीक्षा बुधोत्तमैः ॥

सम्यक् संज्ञायते साधु लोपामुद्रामतस्थितैः ।
सद्भिः संसेवनियेयं ज्ञानदीपविमर्शिनी ॥

(इति नमस्कारपद्धतिः)
ब्राह्मे मुहूर्ते (शयनतल्पाद्)उत्थाय स्वशिरसि श्वेतसहस्रारव्योमाम्बुजोदरगत(रक्तबिम्बं सञ्चिन्त्य तन्मध्ये)पूर्णेन्दुबिम्बमध्ये शुद्धस्फटिकसङ्काशं श्वेतवस्त्र(परिधानं)गन्धानुलेपनं वरदाभयपाणिनं द्विनेत्रं कारुण्यावलोकिनं वामोरुगतया रक्तशक्त्या वामेनोत्पलधारिण्या दक्षिणेन पाणिनाऽऽलिण्गितं परमानन्द-

Page 3

निन्दितं मन्दस्मितेन युतं निजगुरुं ध्यात्वा (ह्रीं श्रीं)अमुकानन्दनाथ (पादं ह्रीं श्रीं)अमुकशक्तियुक्तपादुकां पूजयामीति मनसैर्गन्धाक्षतकुसुमैर्बह्यैर्वा यथासामर्थ्यमभर्च्य नीराजनादिताम्बूलान्तानुपचारान् दत्त्वा नित्यकर्मानुष्ठानार्थमनुज्ञां गृहीत्वा श्रीगुरुं स्वस्थाने विसर्ज्य तां दिशं (प्रति)पञ्चाङ्गेन नमस्कुर्यात् ।
॥ इति श्रीविद्यानन्द(नाथ)विरचितायां (श्रीमत्)त्रिपुरसुन्दरीपद्धत्यां ज्ञानदीपविमर्शिन्यां गुरुध्यानपद्धतिः प्रथमा ॥

Page 4

## मन्त्रध्यानपद्धतिः

अथ (रहःस्थले)ह्रीं श्रीं आधारशक्तिकमलासनाय नम इति स्वासनं मृदु श्लक्ष्णं हृद्यरक्तोत्तराम्बर(च्छद)मभ्यर्च्य स्वासने सुपूजिते समुपविश्य रेचकपूरककुम्भकक्रमेण प्राणायामत्रयं विदध्यात् । तद्यथा - दक्षिणनासाग्रे त्रिकोणं सविसर्गं ह्रूं ह्रूं बिजसहितं

ज्वलदग्निप्रभं ध्यात्वा वामनासाग्रे स्वबीजोपेतं वर्तुलं चन्द्रमण्डलं सञ्चिन्त्य वामया प्रानमापूर्य दक्षिणया "ग्निमण्डले (वि)रेचयेत् । पुनर्दक्षिणया समापूर्य वामया सोममण्डले (वि)रेचयेत् । इत्थं बहुशः कृत्वा तेन विशुद्धनाडिको मध्यपथं प्रविश्य कुम्भकमभ्यसेत् । तद्यथा - आधारहृदयभ्रुमध्येषु वह्निसूर्यसोममण्डलानि दशद्वादशषोडशकलानि परिभाव्य तेषु (मूल)वाग्भवकामराजशक्तिबीजानि वह्न्यर्कशशिनिभानि परस्परसंसक्तनादशिखानि ब्रह्मरन्ध्रान्तं परिभाव्य अकुलामृतरूपेण पूरेण तत्तदाधार-तत्तद्धातु-तत्तद्वर्ण-तत्तदधिपतीनाप्लावयेत् । (ते च मूलाधारस्वाधिष्ठानमणिपूरानाहतविशुद्धाज्ञाख्याः), त्वगसृङ्मांसमेदो "स्थ(रक्त?)मज्जाशुक्राख्या धातवः, वादिसाङ्कितं चतुर्दलपद्मं मूलाधारम्, बादिलाङ्कितं षड्दलं स्वाधिष्ठानम्, डादिफाङ्कितं दशदलं मणिपूरकम्, कादिठाणिकतं भानुदलमनाहतम्, आदिविसर्गाङ्कितं षोडशदलं विशुद्धम्, हक्षाङ्कितं द्विदलपद्ममाज्ञाख्यम्, ब्रह्मविष्णुरुद्रेश्वरसदाशिवशक्त्याख्याधिपतयः प्रत्यङ्गकं पीतरक्तश्यामधूम्रशुक्ला(त्मि?त्म)का ध्येयः ।

Page 5

ततो मातृकान्यासं बिजद्वयसहितं विधाय मूलविद्याङ्गानि कराग्रेषु विन्यस्याभ्यन्तरे कामकलारूपपरापरकुण्डलिनीद्वयं सम्पुटीकृत्य पुनस्तया चतुर्थस्वररूपिण्या मुखस्तनयोनिसर्वाङ्गकल्पनं कृत्वा देवीरूपमात्मानं परिभाव्य गमागमेन मूलविद्यां यथाशक्ति मानसेन विधिना जपित्वा बहिर्निर्गत्याऽऽवश्यकादिकं निर्वर्त्य कृतशौचाचमनदन्तधावनमुखप्रक्षालनः स्नानं कुर्यात् ।
॥ इति (श्रीविद्यानन्दनाथविरचितायां ज्ञानदीपविमर्शिन्यां मन्त्रध्यानपद्धतिर्द्वितीया ॥

Page 6

## स्नानपद्धतिः

स्नानं तु द्विविधं - जलस्नानमान्तरस्नानमिति । तत्र जलस्नानं क्रियानुवर्तिनां साधकसामयिकपुत्रकाचार्याणाम् । योगिनां त्वान्तरमेव स्नानं प्रशस्तम् । तत्रादौ जलस्नानं लिख्यते । यथा - सुगन्धामलकोदकादिना यथाविधि मलशोधनस्नानं निर्वर्त्य मन्त्रस्नानं कुर्यात् । लवरयहाक्षराणि सबिन्दुकानि कृत्वा अस्त्रपरिशोधितवारिधानीजलं दक्षिणहस्ते गृहीत्वा भूतपञ्चकबीजैः सप्तधाऽभिमन्त्र्य मूलमन्त्रेण वामाङ्गुलीच्छटायोगात् त्रिधा मस्तकसेकान्मन्त्रस्नानं निर्वर्त्यावशिष्टं (जलं)वामनासाविवरेण प्रवेश्यान्तःकुम्भितनिखिलकल्मषप्रक्षालनेन कृष्णरूपं पिङ्गलया विरेच्यास्त्रमन्त्रेण वज्रशिलायां ताडयेत् ।
अथ योगिनामान्तरस्नानं लिख्यते । यथा - शृङ्गाटनिलयां कुलशक्तिमुत्थाप्य अकुलशृङ्गाटोदरगतपरबिन्दुं निर्भिद्य परिस्रुतपरमामृतमय्या सुधाधारयाऽविच्छिन्नरूपया मूलशृङ्गाटगर्भं परिपूर्य तयोः सामरस्यनद्यां निमग्नस्तिष्ठेत् । तदुक्तं उदयाकरपद्धत्याम्-

एषा वै योगिनां प्रातःसन्ध्या । तथा मध्याह्नसमयेऽप्यरुणवर्णां तन्तुनिभां कामराजबीजरूपिणीं मूलादिब्रह्मरन्ध्रान्तं

Page 11
ब्रह्मरन्ध्रादिमूलान्तमनुसन्दध्यात् । तथा सायाह्नसमयेऽपि श्वेतवर्णां शक्तिबीजरूपं तन्तुमयीं कुलाकुलयोगेनानुसन्दध्यात् । अर्धरात्रसमये परापरकुण्डलिनीरूपां पद्मरागवर्णां मूलाद् हृदयपर्यन्तं वाग्भवरूपां हृदयाद् भ्रूमध्यान्तं कामराजरूपां भ्रूमध्याच्च ब्रह्मरन्ध्रान्तं शक्तिबीजरूपां ध्यायेत् । तदुक्तं उदयाकरपद्धत्यां -
आद्या मृणालसूत्राभा पीता रक्ता तु मध्यमा ।
श्वेता त्वन्तर्गता शक्तिः सन्ध्या त्रितयरूपिणी ॥

तथा चतुर्थीसन्ध्यानिर्णयस्तत्रैवोक्तः - "कच्छपहृदयबिन्दुकच्छिद्रस्थानात् स्थानान्तरं सन्धयन्ती चतुर्थी सन्ध्या" इति । अथवा चक्रसन्ध्यां कुर्यात् । तदुक्तंसङ्केतपद्धत्यां -
सर्वाधारेषु चक्रेषु शक्तिर्या कुटिला स्थिता ।
आद्यचक्रानुसन्धानात् सा सन्ध्या चक्ररूपिणी ॥

अथवा महासन्ध्यां कुर्यात् । तदुक्तं उदयाकरेणैव -
शिवशक्त्योश्च संयोगी यस्मिन् काले प्रजायते ।
सा सन्ध्या कुलनिष्ठानां समाधिः स प्रतीयते ॥

चन्द्रभास्करसम्मर्दो यस्मिन् काले प्रजायते ।
सा सन्ध्या तामुपासीत लोकसन्ध्यां न चोत्तराम् ॥

Page 12
अथवा ग्रन्थिसन्ध्यां कुर्यात् । तदुक्तं उदयाकरेणैव -
कन्दात् कुण्डलिनी तूर्णं भिन्दन्ती ग्रन्थिसञ्चयम् ।
सिञ्चन्ती चामृतेनैव सन्दधाना परं पदम् ॥

या तु सन्ध्या समाख्याता कौलिकी तु विशेषतः ।
(एवं)हंससन्ध्यां कुर्यात् । तदुक्तं देवीसंस्थाननाम्न्यागमे -
आत्मा त्वादित्यहंसोऽयं पक्षौ चास्य सितासितौ ।
तदन्तर्वर्तते राहुस्तत्र सन्ध्ये गमागमे ॥

कृष्णे सङ्क्रमते नाडी शुक्ले निष्कलवाहिनी ।
एतत्पक्षद्वयं वाहे प्राणाचार्यस्तु चन्द्रमाः ॥

तथा घद्महस्त्रभट्टारके(णापि सन्ध्यानिर्णयः कृतः । यथा)-

प्राणार्कौ सन्नयेत् पश्चाच्छक्त्यन्तमथने यदा ।
त्रिपथे जायते सन्ध्या तन्त्रस्था कुलयोगिनाम् ॥ इति ।
एवं निर्वर्तितसन्ध्यावन्दनस्तर्पणं कुर्यात् ।
॥ इति (श्रीविद्यानन्दनाथविरचितायां ज्ञानदीपविमर्शिन्यां श्रीत्रिपुरसुन्दरीपद्धत्यां)सन्ध्यावन्दनपद्धतिश्चतुर्थ
॥

Page 13

## तर्पणपद्धतिः

(अथ)तर्पणं द्विविधं बाह्याभ्यन्तरभेदेन । (तत्र)बाह्यं कर्मयोगिनाम् । तद्यथा - (मूल)वाग्भवेन (तीर्थजलं)संशोध्य कामराजेनाकृष्य परामृतपदं नीत्वा धेनुमुद्रया शक्तिबीजेन जलान्तः पातयित्वा (परामृतं तज्जलं भावयित्वा)तत्र त्रिकोणवृत्तचतुरस्रं चक्रं परिभाव्य गणेशबटुकौ चक्रद्वारि दक्षिणामतः सन्तर्प्य त्रिकोणचतुरस्रान्तराले ईशानादिवायव्यान्तं (श्री)गुरुपङ्क्तिं सन्तर्प्य त्रिकोणमध्ये वक्ष्यमाण-ऋत्वासनमन्त्रैः सन्तर्प्यान्तर्मुद्राप्रयोगेण कुलकुण्डलिनी द्वादशान्तमुन्नीय परामृतपानोन्मत्तां तां प्रवहणनाड्या त्रिखण्डामुद्रामुद्रिते करकमले विरेच्य वक्ष्यमाणावाहनविद्ययाऽवाह्य संस्थापनाद्यमृतीकरणान् तान् विधाय तत्राङ्गे देवीपरिवृतां तां देवीं ध्यात्वा तुर्यविद्यायुक्तचतुर्थपीठमन्त्रेणाऽस्यकमले परामृतबुद्ध्या सप्तवारं (द्वितीयान्तं तर्पयामीति)सन्तर्प्य ईशदिक्पीठमन्त्रेण गुणदेवीरेकैकशः सन्तर्प्य मूलदेव्यङ्गे लयाङ्गत्वेनाङ्गदेवता एकैकवारं सन्तर्प्य चतुरस्राग्नीशनैर्ऋत्यवायव्येषु हृदयादिचतुष्टयं हारस्फटिकलयाऽञ्जननिभमभयवरदोदितकरसरोरुहयुगलं योषिद्रूपं चतुर्वारं सन्तर्प्य पुरतो नेत्रं दिग्दलेष्वस्त्रं पिङ्गलज्वलदग्निनिभमभयवरोद्यतकरं ध्यात्वा स्वगुणवारं सन्तर्पयेत् । इत्थं

Page 14

सन्तर्प्य हृदयमन्त्रेण परिवारदेवतागणं मूलदेवतायां संयोज्य मूलदेवी संहारमुद्रया विसर्ज्य तया खेचरीं च कृत्वाऽङ्गन्यासं कुर्यात् ।

अथान्तस्तर्पणं योगिनां लिख्यते । यथा - मूलशृङ्गाटात् कुलशक्तिमुत्थाप्य अकुलशृङ्गाटोदरगतं परं बिन्दुं निर्भिद्य ततो निर्गतसुधाधारया स्वशरीरगतनवचक्रदेवतास्तत्तन्मन्त्रानुस्मरण
प्लावयेत् । तदुक्तं च -

विरामोदययोगेन परविज्ञानरूपिणा ।
तर्पयेच्च पितॄन् देवान् गुरूनपि समाहितः ॥

इत्थं तर्पणं निर्वर्त्य सूर्यपूजां कुर्यात् ।

॥ इति (श्रीविद्यानन्दनाथविरचितायां ज्ञानदीपविमर्शिन्यां श्रीत्रिपुरसुन्दरीपद्धत्यां)तर्पणपद्धतिः पञ्चमी ॥

Page 15

# सूर्यपूजापद्धतिः

सूर्यपूजां बाह्याभ्यन्तरभेदेन कुर्यात् । तत्र बाह्या यथा - ह्रां ह्रीं सः इति प्रयोजनतिलकाख्यो मनुस्त्र्यक्षरः सूर्यदैवत्यः । अस्य मध्यमबीजं षड्दीर्घस्वरभेदितं कृत्वानेन कराङ्गन्यासं कृत्वा मूलषडङ्गमपि विन्यस कुङ्कुसिन्दूरादिना सवितृमण्डलं वृत्ताकारमुपलिप्य तस्याग्निरक्षोवाय्वीशानमध्येषु प्रभूतां विमलां सारां समाराध्यां परमसुखां प्रणवद्वयपुरःसरां यष्ट्वा पद्ममुद्रां तन्मध्ये सम्पूज्य (तदुपरि)ह्रां ह्रीं सः सूर्याय प्रकाशशक्तिसहिताय सग्रहराशिनक्षत्रतिथियोगपरिवाराय नम इति मन्त्रेण सूर्यमण्डलरूपमभ्यर्च्य तन्मध्ये त्रिकोणवृत्तचतुरस्रं वर्तयित्वा तस्य वामदक्षिणयोर्गणेशबटुकौ (सम्पूज्य)ईशानादिवायव्यान्तं गुरुपङ्क्तिं (सम्पूज्य)त्रिकोण(वृत्त)मध्ये ऋत्वासनं चाभ्यर्च्य तन्मण्डलान्मनोर्मध्ये त्रिकोणवृत्तचतुरस्रमर्घ्यमण्डलं परिकल्प्य तस्याग्नीशाननैरृत्यवायव्यमध्ये चतुर्दिक्षु सूर्यषडङ्गनाभ्यर्च्य साधारं (अर्घ्य)पात्रं प्रणवाभ्यां प्रतिष्ठाप्य सद्वितीयेन विशेषजलेनापूर्य (मूल)वाग्भवेन संशोध्य कामराजेन सन्दीप्य शक्तिबीजेनामृतीकृत्य तस्मिन्नर्घजले पूर्ववदङ्गद्वयं विन्यस्य सूर्यमन्त्रेण मूलमन्त्रेण च महामुद्रयाऽच्छाद्य सप्तवारं जपित्वाऽनेनार्घ्यजलेनात्मानं पूजोपकर्णानि चाभ्युक्ष्य

Page 16

सूर्यपीठ(पाद)पञ्चकस्य सूर्यस्य च तदुपरिस्थगणपतिं बटुकं पारम्पर्यासनदेवताभ्योऽर्घ्यबिन्दुं दत्त्वा पूर्ववदन्तर्मुद्राप्रयोगेण तन्मण्डले भगवतीमावाह्यार्घ्याद्युपचारैः सम्पूज्य मूलमन्त्रेण सप्तवारं बिन्दुं दत्त्वा धूपदीपादिकं समर्प्य देव्यङ्गेऽङ्गमन्त्राणि लयाङ्गत्वेन सम्पूज्य पुनरङ्गवदग्न्यादिक्रमेणाभ्यर्च्य कोणत्रये देवीत्रयं पुनर्मध्ये मूलेन (मूल)देव्यै पुष्पाञ्जलीं विधाय (धूपदीप)नैवेद्यादि(कं)परिकल्प्य पात्रमण्डलदक्षिणे वृत्ताकारं मण्डलं निर्माय प्रणवाभ्यामभर्च्य अस्त्रप्रक्षालितं ताम्रादीनामन्यतमं चषकं विशेषार्घ्यमिश्रं शुद्धोदकपूर्णं (च)निधाय तस्मिन् कुशयवादिकमष्टगन्धं (सहेतुकं)विन्यस्य रक्तचन्दन(पङ्क)मालोड्य रक्तपुष्पाणि विन्यस्य कुशेनाच्छाद्य मूलसूर्यमन्त्रद्वयं प्रत्येकमष्टोत्तरशतं तच्चषकं स्पृशन् जपित्वा खस्थं कराभ्यामुद्धृत्य मूलमन्त्रद्वयमुच्चार्य मार्तण्डभैरवाय प्रकाशशक्तिसहिताय ग्रहराशिनक्षत्रतिथियोगपरिवारसहितासनस्थायै श्रीमहात्रिपुरसुन्दर्यै नम इति पराङ्मुखोऽर्घ्यं पूजामण्डलस्थायै देव्यै दद्यात् । दृष्टिपथे महामुद्रां बद्ध्वा खस्थां हृत्स्थां मण्डलस्थां वार्घ्यामृतप्लुतां परिभावयन् मूलमन्त्रद्वयं प्रत्येकमष्टोत्तरशतमावर्तयन्नुपस्थानं कुर्यात् । तत्र सपरिवारं सूर्यं

(खे)विसर्जयेत् । भगवतीं सपरिवारामात्मनि विसर्जयेत् । मण्डलस्थानपि मन्त्रानात्मसात् कुर्यात् । (इति बाह्यपूजा)।

(अथ)आ(भ्य)न्तरसूर्यपूजा योगिनां लिख्यते । तदुक्तं भगवता शङ्कराचार्येण -

Page 17

मूलाधारात् स्फुरिततडिदाभप्रभासूक्ष्मरूपोद्गच्छन्त्या मस्तकमणुतरा तेजसां मूलभूता ।

सौषुम्नाध्वाचरणनिपुणा सा सवित्रानुबद्धा ध्याता सद्योऽमृतमथ रवेः स्रावयेत् सार्धसोमात् ॥

(इति)(प्र. सा. १०.७)

(अस्य)कोऽर्थः? मूलाधारात् कुण्डलिनीमुत्थाप्य हृदयार्कमण्डलं नीत्वा तद्गतां तामकुलचन्द्रसूर्यमथनसमुद्भ

मूलमन्त्रं (सं)स्मरन् सिञ्चेत् । एवमाभ्यन्तरसूर्यपूजां निर्वर्त्य द्वारपालानर्चयेत् ।

॥ इति (श्रीविद्यानन्दनाथविरचितायां ज्ञानदीपविमर्शिन्यां श्रीत्रिपुरसुन्दरीपद्धत्यां)सूर्यपूजापद्धतिः षष्ठी ॥

Page 18

## द्वारपालार्चनपद्धतिः

द्वारपालार्चनं द्विविधं बाह्याभ्यन्तरभेदेन । तत्र बाह्यं कर्मयोगिनां यथा -

(रत्न)मण्डपस्य पश्चिमद्वारमागत्य नन्दनोद्यानाय नमः । (ह्रीं श्रीं)रत्नमण्डपाय नम इति मण्डपं रत्नज्योतिःपरिवेष्टितं सोद्यानमभ्यर्च्य ह्रीं श्रीं नन्दनोद्यानाय नमः । द्वारस्य दक्षिणवामशाखयोः क्लीं कं कामदेवाय रत्यै नमः । वं वसन्ताय प्रीत्यै नमः । (गं)गणपतये (नमः) । (सं)सरस्वत्यै (नमः) । (क्षं)क्षेत्रपालाय नमः । ऊर्ध्वोदुम्बरमध्यदक्षिणवामेषु (ह्रीं श्रीं द्वां)द्वारश्रियै नमः । अधोदुम्बरे (दें)देहल्यै नमः । ततो वामपादपुरस्सरमन्तः प्रविश्य सरस्वत्यै नमः । श्रियै (नमः) । मायायै (नमः) । दुर्गायै (नमः) । भद्रकाल्यै (नमः) । स्वस्त्यै (नमः) । स्वाहायै (नमः) । शुभङ्कर्यै (नमः) । गौर्यै (नमः) । लोकधात्र्यै (नमः) । वागीश्वर्यै (नमः) । एता द्वारान्तर्मण्डपाभिमुखाः । द्वारोपरि मञ्चस्थास्तु दक्षिणाद्युत्तरान्तरं

Page 19

पङ्क्तिक्रमेणोपविष्टा वरदाभयचिह्निता रक्ता रक्ताम्बरालङ्कारा (गायिकाः)सम्पूज्याः । ततः सिद्धार्थाक्षतकुसुमानि (आदाय)नाराचास्त्रप्रयोगेण -

अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः ।

ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥

हः अस्त्राय फट् इति मण्डपान्तः प्रक्षिप्य तेषां विघ्नसङ्घातानां निर्गच्छतां वामाङ्गसङ्कोचेन मार्गं प्रदाय (अस्त्रमुच्चरन् वामपाद)पार्ष्ण्याघातत्रयेण भौमांस्तालत्रयेणान्तरिक्षगान्

तिग्मदृष्ट्याऽवलोकेन दिव्यान् विघ्नानुत्सार्य (दक्षिणपादपुरस्सरं)मण्डपान्तः प्रविश्य (ह्रीं श्रीं)वास्तुपुरुषाय नम इति वास्तुपुरुषं मण्डपमध्ये सम्पूज्य मण्डपस्याष्टदिक्षु दिङ्मातरो वशिन्याद्या वक्ष्यमाणमन्त्रैः (पूर्वादीशानान्तं)सम्पूज्याः । तदुक्तं सङ्केतपद्धत्यां -

दिङ्मातरोऽत्र विधिवदष्टदिक्षु समुद्भवाः ।
पुर्यष्टकनिवासिन्यो देव्यस्ता नौम्यनुक्रमात् ॥ इति ।

अथवा इन्द्रादीन् पूजयेत् । ततश्चाधारशक्तिकमलासनाय नम इति साधक आसनं मृगाजिनादीनामन्यतमं मृदु श्लक्ष्णं हृद्यं रक्तोत्तराम्बरमभ्यर्चयेत् ।

Page 20

आसननिर्णय उदयाकरपद्धत्यामुक्तः । यथा -

मेषव्याघ्रगजोक्ष-ऋक्षतुरगत्वग्भिस्तु षड्कर्मसु
प्रत्येकं विविधासनानि क्रिमिजं भाराख्यशृङ्गं तथा ।
मोक्षं भोगदमासनं च कुरुते त्वौर्णं तथा चैलजं
वैत्रं चैव मृगाजिनं शुभकरं सर्वं प्रणीतं बुधैः ॥

भूमौ भूपभयं कुलक्षयकरं वंशासनं रोगदं
काष्ठं चैव तथासनं च कुरुते शैलं महादुःखदम् ।
फुल्लं पल्लवमृत्तिकासनयुतं तार्णं च विद्वेषकृद्
मैषं क्रैमिअमासनादिसकलं मोक्षादिसिद्धप्रदम् ॥ इति ।

विकल्पजालमुत्सृज्य व्यवहारदशास्वयम् ।
सावधानैकमनाः(नसा)स्वासने पूजितो विशेत् ॥

लोहितां सर्वसामग्रीं दिव्यदृष्ट्यावलोकयेत् ।
निबध्नीयात् ततः सम्यक् श्रीमत्त्रैपुरमासनम् ॥

रक्ततेजोमयं व्याप्य त्रिलोकं निजसंविदा ।
गोरोचनां समालोड्य सम्प्रार्थ्यानीय मन्त्रतः ॥

Page 21

इत्युक्तस्वासने समुपविश्य प्राणायामेन पूर्ववन्मन्त्रध्यानं कृत्वा षडङ्गानि विन्यस्य चक्रमुद्धरेत् । (तस्मिन्नासने प्राङ्मुख उपविश्य प्राणायामेन पूर्ववन्मन्त्रध्यानं कृत्वा वक्ष्यमाणाङ्गानि विन्यस्यार्घ्यसाधनं कुर्यात् । अस्त्रवारिध(आ)नीजलेन स्वकीयदक्षिणभागे त्रिकोणवृत्तचतुरस्रं मण्डलं विधाय उक्तप्रणवेनाभ्यर्च्य मूलमध्यान्तबीजैः साधारणपात्राणि प्रतिष्ठाप्य तेषु पृथग् द्रव्याणि निक्षिपेत् । चन्दनपुष्पाक्षतदूर्वाङ्कुराणि तस्मिन् निक्षिप्य प्रत्येकपात्राणि संस्पृश्य

प्रत्यक्षं इव सम्पाद्य देव्या आसनपङ्कजम् ।
मध्याद्यन्ताधिकं चान्य(द्)यन्न्यूनं च समं भवेत् ॥

इदानीमस्मच्छ्लोकान् प्रब्रूमहे -
मन्त्रसंस्कारसंशुद्धं रजः सुस्निग्धमुज्ज्वलम् ।
शुभं चैवाशुभं चान्यद् रक्तं चैव विवर्णकम् ॥

बाह्यस्थसत्त्वादिरेखास्तिस्रः सितरक्तकार्ष्ण्यवर्णा अङ्गुष्ठमानेन प्रथमा कार्या पादोना द्वितीया यवद्वयोना तृतीया । एवं तिस्रो रेखा भुक्तिकामस्य समा मुक्तिकामस्य । अथवा पृथिव्यादिसूत्ररेखापञ्चकं पीतविशदाभशोणधूमधूसरवर्णैर्बाह्यस्थपार्थिवरेखाः । अण्गुष्ठपरिमिताद्यवशिष्टानामनन्तरं तण्डुलो नाम तं पदार्थसङ्ख्याक्रमेण नाना द्रष्टव्येति ।

Page 26
योगोऽन्यो देवताश्चान्याः संविच्चान्या क्रियास्तथा ।
आचार्यस्य महादोषा एते विघ्नविनायकाः ॥

यजन् सपदि भक्तस्य पूजासम्भारपुष्कलाः ।
ततो निर्विघ्नतां यान्ति शब्दा देशिकशिष्ययोः ॥

मण्डलनिर्वचनं उदयाकरपद्धत्यामुक्तम् । यथा - मण्डनार्थधातोरचि परे मण्डः सम्पत्, तं लाति ददातीति मण्डलम् । तन्महिमाऽपि तत्रैव सूचितः -
अखण्डमण्डलाकारं विश्वं व्याप्य व्यवस्थितम् ।
त्रैलोक्यं मण्डितं येन मण्डलं तत् सदाशिवम् ॥

मकारे मातरः सर्वा डकारे डाकिनीगणाः ।
लकारे लाकिनी यस्मात्तस्मान्मण्डलमुच्यते ॥ इति ।
एवं विरचितमण्डले समस्तप्रकट-गुप्त-गुप्ततर-सम्प्रदाय-कुल-कौल-निगर्भ-रहस्यातिरहस्य-परापररहस्ययोगिनीसिद्धिपादुकाभ्यो नम इति पुष्पाञ्जलिं विकिरेत् ।
आभ्यन्तरचक्रं योगिनां लिख्यते । यथा - पञ्चशक्तिचतुर्वह्न्यात्मकत्वाच्छरीरमेवाकृतकं चक्रम् । तेन मेढ्राधारादिद्वादशान्तपर्यन्तं नवाधारेषु नवधा विभक्तं चक्रं स्थितम् । क्षित्यादिप्रकृत्यन्तं नवतत्त्वात्मकं प्रतिशृङ्गाटं यन्त्रराजं

Page 27
वाग्भवबिन्दुकामकलात्रिधामबीजत्रयसमेतं परिभाव्य पूर्वोक्तमन्त्रस्मरणेन परामृतकुसुमं विकिरेत् । तदुक्तं क्रमस्तोत्रे -
एका या पञ्चशक्तिक्रमवरहुतभुग् युग्मयुग्मैश्च वृत्तैः
सा त्वीषन्मण्डलान्तः प्रभवति सततं योनिभिस्त्र्युत्तराभिः ।

चत्वारिंशद्भिरुच्चैरकृतकवलनारञ्जिते दिव्यपद्मे
  द्वन्द्वाङ्के द्वारतुर्ये दिशतु जगति शं चक्रदेवीयुता सा ॥

प्राणो वह्निरिहोच्यते प्रलयकृज्जन्मादिशीर्षान्तगः
  प्रोन्मेषक्षितितुर्यमारुतमहाभूतान्तसत्ताश्रयः ।
शक्तिः शाम्भवधामतस्त्वनवधि सृष्टिक्रमप्रोदि(त्थि)ता
  आदिर्हान्तगता सदेति गुरुतो ज्ञात्वाऽमरत्वं भजेत् ॥

अग्निरूर्ध्वगतिर्नृणां चायुः संहर्तुमुद्यतः ।
  शक्तिः सामृतवर्षेण तं विलाप्य ततः सृजेत् ॥

तस्मादकुलतः शक्तिं प्रसृतां भावयेद् बुधः ।
तद्भावनाच्च सततं त्रिजगत् स्यादनश्वरम् ॥

इत्थं चक्रं लिखित्वाऽर्घ्यं साधयेत् ।
॥ इति (श्रीविद्यानन्दनाथविरचितायां ज्ञानदीपविमर्शिन्यां)चक्रोद्धारपद्धतिरष्टमी ॥

Page 28

## अर्घ्यसाधनपद्धतिः

अर्घ्यं तु द्विविधं - बाह्याभ्यन्तरभेदेन । तत्र बाह्यं यथा - मण्डलात्मनोर्मध्ये ईकाराङ्कितत्रिकोणषट्कोणवृत्तचतुरस्र(मर्घ्य)मण्डलं परिकल्प्य तन्मण्डले शङ्खमुद्रया दक्षिणकराङ्गुष्ठेनावष्टभ्याग्नीशासुरवायुषु हृदयादिचतुष्टयं मध्ये नेत्रं दिक्षु चास्त्रमित्यङ्गानि सम्पूज्य (मूलेनाभ्यर्च्य)तन्मध्ये त्रिपुरा(र्घ्य)पात्राधारं स्थापयामीति संस्थाप्य (अं)अग्निमण्डलाय दशकलात्मनेऽर्घ्यपात्रासनाय नम इति सम्पूज्य (मुलेनाभ्यर्च्य तत्र)तदुपरि वृत्ताकारेण (पूर्वादिक्रमेणाग्नि)कलादशकं पूजयेत् । यथ - (ह्रीं श्रीं)यं धूम्रा पादु । ह्रीं श्रीं रं नीलरक्ता । ह्रीं श्रीं लं कपिला । ह्रीं श्रीं वं विस्फुलिङ्गिनी, ह्रीं श्रीं शं ज्वाला, ह्रीं श्रीं षं अर्चिष्मती, ह्रीं श्रीं सं हव्यवाहिनी । ह्रीं श्रीं हं कव्यवाहिनी । ह्रीं श्रीं ळअं रौद्री । ह्रीं श्रीं क्षं संहारिणी च पादुकां पूजयामि । तदुपरि सौवर्ण-राजत-विश्वामित्र-महाशङ्खादीनामन्यतमं पात्रमस्त्रप्रक्षालितं सुधूपितमादाय त्रिपुरापात्रं प्रतिष्ठापयामीत्यासने प्रतिष्ठापयेत् । उक्तं च तद्

———————-

ऐं ह्रीं श्रीं डं धूम्रापादुकां पूजयामि । ऐं ह्रीं श्रीं ठं (ढं)नीलरक्तापादुकां पूजयामि । ऐं ह्रीं श्रीं णं कपिलापादुकां पूजयामि । ऐं ह्रीं श्रीं तं विस्फुलिङ्गिनीपादुकां पूजयामि ।

Page 29

देवतामन्त्रतृप्त्यर्थं मनस्युन्मनहेतवे ।
आसवं पीयते यत्नान्न च लौल्यात्तु कर्हिचित् ॥

Page 38
चन्द्रार्कानलसङ्घट्टाद् गलितं यत्परामृतम् ।
तेनामृतेन दिव्येन तर्पयेत् त्रैपुरीं पराम् ॥

शिवशक्त्युपमर्दाच्च यज्जातममृतं परम् ।
तत्पिबेन्मधुपानं यत् संसारार्णवतारकम् ॥

सामरस्यं भवेत्तेन तथाऽनन्दो महान् भवेत् ।
अन्तःस्वानुभवोत्साहो मनोवाचामगोचरः ॥

तथा लघुचर्चाकुले श्लोकयुगलं -
परमानन्दमद्येन यस्य चोन्मत्तता भवेत् ।
तन्मद्यं योगिभिः सेव्यं न मद्यं गौडपिष्टजम् ॥

अक्षजं च पशुं हत्वा ज्ञानखड्गेन योगवित् ।
भक्षयेदक्षजं मांसं न मार्गं मेषछागजम् ॥

नो दोषोऽस्ति पले न चासवमखे नो मैथुनक्रीडया
मद्ये चापि महेश्वरः स्वयमसौ तिष्ठत्यनिष्टापहः ।
श्वासोऽधः स च शक्तिरूर्ध्वपवनः साक्षात् शिवः प्रोच्यते
त्वन्योन्यं शिवशक्तिजं हि मथनं व्याप्तं जगत्तेन तत् ॥

॥ इति श्रीविद्यानन्दनाथविरचितायां श्रीत्रिपुरसुन्दरीपद्धत्यां ज्ञानदीपविमर्शिन्यामर्घ्यसाधनपद्धतिर्नवमी ॥

Page 39

## मन्त्रोद्धारपद्धतिः

अथ मन्त्रोद्धारो यथा -
प्राणो देवी सखाद्यो दशशतनयनः शम्भुरग्निस्त्रिमूर्तिः
शून्यश्चन्द्रार्धनादो हिमरुचिरुचिरो वाग्भवोऽसावकीलः ।
सोऽयं ध्यानाज्जपाद्वा मुखकुहरलसद्गद्यपद्यप्रबन्ध-
श्छन्दोलङ्कारतर्कागमविशदमतिर्वाक्पतिर्जायते च ॥

धामत्रयाद्विरहितो योगेशानां मुखे स्थितः ।
सतां तु कथितं ताभिः स्वयमुच्चरते तु सः ॥

शून्याच्छम्भुस्ततः शक्तिः शक्तेर्धामत्रयात्मकम् ।
प्रभवेत यतः सर्वं दीप्तं वर्णकदम्बकम् ॥

अनुत्तरं तदेवोक्तं सद्यः कौलिकसिद्धिदम् ।
तारकं च तदेव स्याचन्द्रभास्करवह्निगम् ॥

तकारे सोमधामस्याद्यो रेफः स च भास्करः ।
दण्डवल्लसते वह्निरेकीभूतं तदाद्यकम् ॥

यन्त्रराजोद्धारोऽपि श्रीत्रिपुरार्णवे दर्शितः । यथा -
कामयानं प्रकर्तव्यं मन्मथं कारयेत्तनुम् ।
कन्दर्पं मन्दिरं कृत्वा द्विधाभूतं च पार्वति ॥

Page 46
मकरध्वजं न्यसेद् देवि षड्वाने तस्य सुव्रते ।
मोहनाभ्यन्तरे कृत्वा वेष्टयेत् तस्य मायया ॥ (इति।)
रसाधारं गुणरूपेण विभज्य त्रिबीजसङ्गतं कुर्यात् । यथा -
वसुदलाब्जयोस्तटित्प्रभं वाग्भवं डादिफान्तं कठाब्जयोः कामराजमादिसहक्षयोः शक्तिबीजं ध्यात्वा आद्यवर्णपद्मयोः स्वस्ववर्णान्ते त्वैकारान्तं शिवशक्तिवर्णकदम्बकं सञ्चिन्त्य मध्यपद्मयोः स्वस्ववर्णान्ते त्वीङ्कारान्तशिवशक्तिवर्णकदम्बकं सञ्चिन्त्यान्त्यपद्मयोरपि स्वस्ववर्णान्ते त्वौङ्कारान्तशिवशक्तिवर्णकदम्बकं सञ्चिन्त्य मूलाधारादिब्रह्मरन्ध्रान्तं नवाधारेषु शून्यादिनवनादान् (सृष्टिक्रमेण)विन्यसेत् । यथा -

## नवनादन्यासः

शुन्यः स्पर्शस्तथा नादो ध्वनिर्बिन्दुस्तथैव च ।
शक्तिर्बीजाक्षरं चेति अष्टधाऽनाहतं स्मृतम् ॥

विकाराष्टकेन सहाऽविकृतो नादो नवमः ।
(अविकृतनादाय नमः शिरसि, शून्याय नमो ललाटे, स्पर्शाय नमो भ्रूमध्ये, नादाय नमो नासिकायाम्, ध्वनये नमो वदने, बिन्दवे नमः कण्ठे, शक्तये नमो हृदये, बीजाय नमो नाभौ, अक्षराय नमो मूलाधारे।)

Page 47

Page 50

दं धं नं ज्म्रीं अरुणावाग्देवतायै नमो हृदि, ३ पं फं बं भं मं ह्स्ल्व्यूं जयिनीवाग्देवतायै नमो नाभौ, ३ यं रं लं वं शं झ्ं र् यूं सर्वेश्वरीवाग्देवतायै नमो गुह्ये, ३ षं सं हं ळअं क्षं क्ष्म्रीं कौलिनीवाग्देवतायै नमः पादयोः । इति वशिन्याद्यष्टकन्यासः।)

## पीठचतुष्टयन्यासः

आधारहृदयभ्रूमध्यब्रह्मरन्ध्रेषु पीठचतुष्टयं न्यसेत् । यथा -
प्रथमबीजमुच्चार्य अग्निचक्रे कामगिर्यालये कामेश्वरीपीठे मित्रीशनाथात्मके (श्री)कामेश्वरीदेवीश्रीरुद्रात्मश
पूजयामि नमः । द्वितीयबीजमुच्चार्य सूर्यचक्रे जालन्धरपीठे षष्ठीशनाथात्मके (श्री)वज्रेश्वरीदेवीश्रीविष्णवात्म
। तृतीयबीजमुच्चार्य सोमचक्रे पूर्णगिरिगह्वरे ओड्डीशनाथात्मके श्रीभगमालिनीदेवीब्रह्मात्मशक्तिश्री।
। समस्तं तुर्यं वोच्चार्य ब्रह्मचक्रे ओड्याणपीठे श्रीचर्यानाथात्मके श्रीमहात्रिपुरसुन्दरीदेवीपरब्रह्मात्मशक्तिश्री
नमः ।

## तत्त्वन्यासः

ततस्तत्त्वन्यासं विदध्यात् । प्रथमबीजमुच्चार्य आत्मतत्त्वव्यापिकायै श्रीमहात्रिपुरसुन्दर्यै नम इत्याधारादिब्रह्मरन्ध्रान्तं न्यसेत् । द्वितीयबीजं

Page 51

उच्चार्य विद्यातत्त्वव्यापिकायै श्रीमहात्रिपुरसुन्दर्यै नम इति मूलादिब्रह्मरन्ध्रान्तम् । तृतीयबीजमुच्चार्य शिवतत्त्वव्यापिकायै श्री(महा)त्रिपुरसुन्दर्यै नम इति मूलादिकल्पान्तम् । समस्तं तुर्यबीजं वोच्चार्य सर्वतत्त्वव्यापिकायै श्रीडमहा)त्रिपुरसुन्दर्यै नम इति पादादिकेशान्तं केशादिपादान्तं च व्यापकतया विन्यसेत् ।
इत्थं विन्यस्य त्रिखण्डामुद्रया पूर्वोक्तां (आ)वाहनविद्यां स्मरन्नकुलशृङ्गाटदेवीचैतन्यं स्वमूर्तावावाह्य देवीरूपं स्वकं ध्यात्वा मूलमन्त्रेण स्वात्ममस्तके तुर्यसमयविद्यया भगमालिन्या वा तुर्यबीजेन वा त्रिधा पुष्पाञ्जलिं विकीर्य गन्ध-पुष्पादिना स्वात्मानमलङ्कृत्य मुद्रानवकं प्रदर्श्य ध्यानं कुर्यात् ।
॥ इति (श्रीविद्यानन्दनाथविरचितायां त्रिपुरसुन्दरीपद्धत्यां ज्ञानदीपविमर्शिन्यां)न्यासपद्धतिरेकादशी ॥

Page 52

अथवा उदयाकरपद्धत्यामुक्तन्यायेन त्रैविध्यं द्रष्टव्यम् । तद्यथा -
स्थूला विश्वप्रपञ्चाख्या सूक्ष्मा तद्व्यापिनी कला ।
केवला च परा प्रोक्ता त्रिभिर्भेदैर्व्यवस्थिता ॥

स्थूला शब्दमयी प्रोक्ता सूक्ष्मा चिन्तामयी भवेत् ।
चिन्तया रहिता या च सा परा परिकीर्तिता ॥

प्रवेशे सृष्टिकृत् पूर्णा निर्गमे संहृतिः कृशा ।
तयोरैक्यं तु यत्स्थैर्यं ज्ञात्वा गुरुमुखाद् भजेत् ॥

आद्यन्तयोः समरसं स्वप्रकाशविमर्शयोः ।
शृङ्गाटोदरमध्ये च समीकृत्य विभावयेत् ॥

Page 57

एतद् ध्यानं समाख्यातं चारोच्चारविवर्जितम् ।
सर्गद्वयपुटान्तस्थमनच्कद्वयसंश्रितम् ॥

ज्योतिस्तन्तुनिभं ध्येयं कुलाकुलनियोजनात् ।
शृङ्गाटद्वयमध्यस्थं शक्तिद्वयपुटीकृतम् ॥

सदा समरसं ध्येयं ध्यायन्ति कुलयोगिनः ।
किरणस्थं सदाग्निस्थं चन्द्रभास्करमध्यगम् ॥

महाशून्ये लयं कृत्वा पूर्णस्तिष्ठति योगिराट् ।
निरालम्बे पदे शून्ये यत्तेज उपजायते ॥

तद्गर्भे अभ्यसेन्नित्यं ध्यानमेतद्धि योगिनाम् ।
वडवामणीन्द्रियं यच्च मीलनोमीलनात्मकम् ॥

सदा विकसितं कृत्वा क्षरन्तीं भावयेत् कलाम् ।
एवं ध्यानं समाख्यातमन्तस्थं कुलयोगिनाम् ॥

सूक्ष्मात् सूक्ष्मतरा मनोहरतमा कन्दोत्थिता कुण्डली
स्वाधाराद् बिसतन्तुसन्ततिनिभा निर्भिद्य लिङ्गत्रयम् ।
सान्द्रानन्दपराब्जसम्भवसुधामापीय सम्प्लाव्य तत्
पायाद् वः परमेश्वरी निजपथं तेनैव याता पथा ॥

Page 58

विद्युत्पुञ्जनिभां नमामि सततं प्राग्भारसूक्ष्मां गिरा

## पूजापद्धतिः

अथ पूजां कुर्यात् । सा द्विविधा - बाह्याभ्यन्तरभेदेन । बाह्या कर्मयोगिनाम् । तद्यथा - अर्घ्यपात्रे त्रिकोणं परितो वृत्तं चतुरस्त्रं सञ्चिन्त्य तस्य द्वारप्रदेशे वामदक्षिणयोः (गणेशबटुकौ सम्पूज्य)ह्रीं श्रीं कुलगणपतिनाथवल्लभाम्बासहित(श्री)पादुकां पूजयामि, ह्रीं श्रीं कुलबटुकनाथवल्लभाम्बासहित(श्री)पादुकां पूजयामीति सम्पूज्य वृत्तचतुरस्त्रान्तराले ईशानादिवायव्यान्तं गुरुक्रममभ्यर्च्य त्रिकोणाभ्यन्तरे षडासनमर्चयित्वाऽन्तर्मुद्राप्रयोगेण भगवतीमावाह्य मूलेन त्रिधा सम्पूज्याग्नीशासुरवायव्येषु हृदयादिचतुष्टयं मध्ये नेत्रं दिक्षु चास्त्रमिति सम्पूज्य त्रिकोणाग्रदक्षवामकोणेषु कामेश्वर्यादिदेवीत्रयन्यासओक्तमन्त्रैराराध्य त्रिकोणमध्ये मूलदेवीं न्यासोक्तचतुर्थमन्त्रेण सम्पूज्य स्वशिरश्चक्रेऽप्यर्घ्यवत् सर्वं सम्पूज्याग्रेऽपि शिरश्चक्रवत् पूजां कृत्वा मूलमन्त्रमष्टाविंशतिवारमावर्त्याभ्यन्तरहोमं (कृत्वा यथा नाभिदलचिदग्नौ विषययोगं जुहुयात् । मूलमन्त्रमुच्चार्य)

धर्माधर्महविर्दीप्ते आत्माग्नौ मनसा स्रुचा ।
सुषुम्णावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहम् ॥ स्वाहा ।
इति त्रिवारं हुत्वा ।

Page 63

प्रकाशाकाशहस्ताभ्यामवलम्ब्योन्मनीस्रुचा ।
धर्माधर्मफलस्नेहपूर्णे वह्नौ जुहोम्यहम् ॥ स्वाहा ।

इति मूलमन्त्रादिकेन मन्त्रेण पूर्णाहुतिं हुत्वा वक्ष्यमाणक्रमेण विधाय परिशोधितघटस्थवारुणीजलेन पात्रान्तरमापूर्य तस्मिन्नर्घ्यपात्रे बिन्दुं निक्षिप्य तच्छिरःपङ्कजस्थाय श्रीगुरवे निवेद्य तत्त्वत्रयमन्त्रेण त्रिवारं स्वीकृत्य तरुणानन्दीभूत्वा कुलामृतोद्धारार्थं दूतीयागमारभेत् । तद्यथा -

## घ. ङ. पाठः

अथ पूजां कुर्यात् । मूलदेव्यै पूजां समर्पयेत् । अथ मूलमन्त्रेण श्रीत्रिपुरसुन्दरी स्वाहा । गन्धं दत्त्वा वौषडन्तेनाक्षतं कुसुमं दत्त्वा बाहुमालां च दत्त्वा मूलेन श्रीमहात्रिपुरसुन्दरी अर्घ्यं नम इति शिरसि सिन्दूरदूर्वातण्डुलार्घ्यं दत्त्वा पादयोः पाद्यं नमः । तेनैव आचमनीयं स्वधा । मधुपर्कं नमः । मधुपर्कं दत्त्वा पुनराचमनीयं नमः । स्नापनार्थं मण्डलवामभागे रत्नसिंहासनं परिकल्प्य रत्नपादुके दत्त्वा तत्रानीय रत्नसिंहासनोपरि रत्नपीठिकायां समुपवेश्य कुङ्कुमानुलेपनादिनालभ्य सचन्दनोदकेऽर्घ्यादिपूर्वकं स्नानं परिकल्प्य अष्टाङ्गोद्वर्तन-पञ्चामृत-अष्टगन्धसुगन्धात्मकेन गन्धोदकेन स्नात्वा अक्षतादर्शनचन्दनादिपञ्च(ओ)पहारः सम्पूज्य वस्त्रं परिधाय रत्नपादुकाभूषणार्थं मण्ड(प)मध्यं आनीय तत्र सिंहासने उपवेश्य मूलेन श्रीमहात्रिपुरसुन्दरीं मुक्ताभरणाद्युपचारान् नमोऽन्तेन समर्प्य पुनरर्घ्याद्युपचारान्

विधाय पूजार्घ्यमण्डलयोर्मध्यत्रिकोणवृत्तचतुरस्रमण्डलं विधाय द्रव्येण वेदनामभ्यर्च्य प्रतिपदादिपञ्चदश्यन्तं कामेश्वर्यादिनित्यानामेकैकं सम्पूज्य षोडशमाद्यावरणपूजामारभेत् ।

Page 64
सुलक्षणां दूतीमानीय तूलिकोपरि आधारमदिरार्णवपोतासनपङ्केरुहमहाप्रेतासनपर्यङ्कासनानि पञ्चप्रणवादीनि पादान्ताद्युपर्युपरि पूजयेत् । तत्रोपविश्य वामश्वासस्य पुरतो भुवि मण्डलमर्घ्यमण्डलवद् विधाय तत्र बटुकं सशक्तिकं सम्पूज्य मातृकायोगेन पञ्चप्रणवान् दूतीशरीरे विन्यस्य तस्या ललाटे त्रिकोणं निर्माय त्रिकोणाग्रादारभ्य कुलगणपकुलाध्यक्षान् लक्ष्मीसरवत्यौ च पूजयेत् ।
सिंहाजिताऽपराजिता विजयानङ्गसंज्ञया ।
भुजगश्चित्रविचित्रौ कनकः कनकाम्बरः ॥

इत्यमी नव कुलाध्यक्षाः । वसन्तकामौ दक्षवामस्तनचूचुकयोरिन्दुं तद्वृत्तयोः सम्पूज्य क्लीं कामदेवपादु । वं वसन्तपादु । सं सोमपादु । इति तेषां मन्त्राः । कामसोमयोः कलान्यासो दक्षपादाङ्गुष्ठादारभ्य मूर्धान्तं मूर्धादिवामपादाङ्गुष्ठान्तमारोहावरोहक्रमेण न्यसेत् । यथा -
श्रद्धा प्रीती रतिश्चैव धृतिः कान्तिर्मनोरमा ।
मनोहरा मनोन्मत्ता मदनोन्मादिनीति च ॥

Page 65
मोहिनी नाम शोषणी च वंशकारी च रञ्जकी ।
सुभगाकर्षणी चैव षोडशी प्रियदर्शना ॥

अकारादिस्वरैरेताः कलाः कुसुमधन्वनः ।
पूषा यशोदा सुमना रतिः प्रीतिस्तथा धृतिः ॥

ऋद्धिः सौम्या मरीचश्च दशमी चांशुमालिनी ।
अङ्गिरा शशिनी चेति छाया सम्पूर्णमण्डला ॥

तुष्टिश्चेत्यमृता चेति कलाः सोमस्य षोडश ।
एता अपि अकारादिस्वरसहिताः । ततश्चापं पृष्ठवंशादारभ्य शिरोन्तश्चापाकृतिशरीरापरभागादि न्यसेत्। ३ धां कामचापपादुकां पूजयामि । ३ धां सोमचापपादु । इति मन्त्रेण पूर्वभागे ह्रीं शिञ्जिनीपादु । इति शिञ्जिनीरूपं विन्यस्य मूलपादमुखगुह्यहृदयेषु पञ्चबाणन् ३ द्रां द्रावणबाणपादुकां पूजयामि ३ द्रीं उन्मादनबाणपादुकां पूजयामि ३ क्लीं मोहनबाणपादुकां पूजयामि ३ ब्लूं सन्दीपनबाणपादुकां पूजयामि ३ सः शोषणबाणपादु । इति पञ्चबाणबीजानि ।

ततो वाग्भवमूर्धाग्रं देहे विन्यस्य दक्षरेखायां ह्रीं सुभगापादुकां पूजयामि, पश्चिमरेखायां ३ स्त्रीं भगपादुकां पूजयामि, वामरेखायां ३ क्लीं भगसर्पिणी पादुकां पूजयामि, मध्ये

Page 66
ह्रें भगावहापादु । इति मध्ये सम्पूज्य हृदयनाभिशिरोगुह्येषु पीठचतुष्टयं पूजयेत् ।
यथा - ओड्याणमहापीथे श्री-ओड्डेश्वरीदेवि श्री-ओड्डीशनाथदेव श्रीरक्ताम्बादेवि श्रीचर्यानाथपादुकां पूजयामि, श्रीजालन्धरमहापीठे श्रीजालेश्वरीदेवि श्रीजालीशनाथदेव श्रीकराम्बादेवि श्रीषष्ठीनाथपादुकां पूजयामि, श्रीपूर्णगिरिमहापीठे श्रीपूर्णेश्वरीदेवि श्रीपूर्णेशनाथदेव श्रीचण्डाम्बादेवि श्री-ओड्डीशनाथपादुकां पूजयामि, श्रीकामरूपमहापीठे श्रीकामेश्वरीदेवि श्रीकमेशनाथदेव श्रीमहोच्छुष्मदेवि श्रीमित्रीशनाथपादुकां पूजयामि । गुह्यपीठं(ठ)वामभागे गुरुपङ्क्तिं सम्पूजयेत् । यथा - ह्रीं श्रीं परमशिवनाथपादुकां पूजयामि, ह्रीं श्रीं पराशक्त्यम्बापादुकां पूजयामि, ह्रीं श्रीं श्री-उष्णीशनाथपादुकां पूजयामि, ह्रीं श्रीं श्रीचिञ्चणीनाथपादुकां पूजयामि, ह्रीं श्रीं श्रीभगानन्दनाथपादुकां पूजयामि, ह्रीं श्रीं श्रीचन्द्रगर्भानन्दनाथपादुकां पूजयामि, श्रीमहिमानन्दनाथपादु । इत्यादि स्वगुर्वन्तं हृदयकमलमध्येऽनङ्गाद्यष्ट-

Page 67
शक्तिपरिवृतां कामेशीमूलविद्यां न्यसेत् । यथा - पूर्वाद्यष्टदलेषु प्रादक्षिण्येनानङ्गकुसुमादेवि अनङ्गमेखला अनङ्गमदना अनङ्गमदनातुरा अनङ्गमदनवेगा अनङ्गभुवनपाला अनङ्गशशिरेखा अनङ्गरेखा इति भगमालिनीं गुह्ये भगभुगे भगिनीत्यादिना सम्पूज्य आधारहृदयभ्रूमध्यब्रह्मरन्ध्रेषु मुद्राचतुष्टयबीजानि हें(ऐं)ह्रीं श्रीं क्लीं अनंङ्रालम्बाख्यां पञ्चमीमनुस्मरेत् । यथा - ऐं ब्लें ग्लां ब्लां वः । योनिमुद्रास्मरनादाधारे शक्तिक्षोभं चिन्तयेत् । सा योनिमुद्रा । पुनस्तां शक्तिमाधाराद् हृदयाम्बुजं नीत्वा ऐं क्लीं स्त्रीं इति क्षोभणीविद्यां स्मरेत् । कालानलचक्रं भ्रमणचतुरया सकलमलकाननविदाहं निरूपयेत् । सा भवेत् क्षोभणीमुद्रा । पुनस्तां भ्रूमध्यं नीत्वा ऐं झुं ब्लीमिति द्राविणीविद्यामुद्रां स्मरन् शक्तिक्षोभं चिन्तयेत् । सा भवेद् द्राविणी मुद्रा । पुनस्तां ब्रह्मरन्ध्रं नीत्वा परामृतकलास्रुवापूरेण सह मूलाधारमानीय ऐं गुह्ये वौं वा स्त्रीं हें य र व ल इति सर्वाङ्गसुन्दरीमुद्रां स्मरेत् ।
अथ परमानन्दनिर्भरमानसो न किञ्चिदपि चिन्तयेत् । सौषा निरालम्बनाख्या मुद्रा । ततः पञ्चरत्नबीजानि शिरोवक्त्रहृदयगुह्यपादेषु ग्लूं स्लूं म्लूं प्लूं न्लूं इति तस्या योनौ मूलाद्यबीजं विन्यस्य स्वनवशिवे मूलकामराजं विन्यस्य

Page 68
ततः सुरक्तकरवीरपुष्पाणि पञ्चपञ्चभिः शरैरभिमन्त्र्य तस्या मदनमन्दिरे क्षिप्त्वा तां क्षोभयेत् स्वयमक्षुभितः सन् । ततो दिव्यपूरितं पात्रान्तरमानीय श्रीनाथाय निवेद्य दूत्यै दत्त्वा स्वयमपि स्वीकृत्य दूतीतनुकृतन्यासान् स्वतनावपि विधाय तां कामेश्वरीं परिभाव्यात्मानं कामेश्वरं ध्यात्वा

गन्धहस्ताख्यमुद्रया यावन्मदस्रुतिस्तावद् द्राविणीमुद्राविद्यां जपन् योनिमथनं कुर्यात् । ह्रीं चपले चलचित्ते रेतो मुञ्च ब्लूं क्लीं स्त्रीं हें य र व ल । एषा विंशत्यक्षरा द्राविणीविद्या । साष्टाक्षरेण सह बीजेन तस्या इतीच्छानुरूपं मिथुनीभावं कुर्यात् । पश्चाद् वामामृतेन प्रक्षाल्य कुण्डगोलोद्भवं पात्रान्तरे कृत्वा तदर्घ्यपात्रे निक्षिप्य तेन सक्रमं परमेश्वरीमाराधयेत् ।
ततो मण्डलद्वारि वामदक्षिणयोः गां गणपतये नमः, बां

Page 69

बटुकभैरवाय नम इति सम्पूज्य चतुरस्रषोडशदलान्तराले ईशानादिवायव्यान्तं गुरुपङ्क्तिं सम्पूज्य चतुरस्रदलचतुर्दशारयुग्माष्टारमध्यत्रिकोणेष्वासनषट्कं न्यासोक्तमन्त्रैः समाराध्य त्रिकोणमध्याग्रदक्षिणवामकोणेषु ह्रीं श्रीं श्री-ओड्याणपीठपादुकां । श्रीकामरूपपीठपादुकां पूजयामि, श्रीजालन्धरपीठपादुकां पूजयामि, श्रीपूर्णगिरिपीठपादु । एतानि चतुरस्रषड्बिन्दुवृत्तार्धचन्द्रत्रिकोण पीतधूम्रश्वेतरक्तानि चतुष्पीठान्यभ्यर्च्य ओड्याणपीठमध्ये कदम्बवनान्तश्रीमञ्चपादत्वेन लां ब्रह्मणे पृथिव्यधिपतये नमः, वां विष्णवे अपामधिपतये नमः, रां रुद्राय तेजो।आधिपतये नमः, यां ईशानाय वाय्वधिपतये नमः - इत्येतान्यभर्च्य ह्सौं वियदधिपतये पञ्चवक्राय आनन्दसदाशिवमहाप्रेतपद्मासनाय नम इति मञ्चाकारं सदाशिवमभर्च्य सिंहासनप्रसूनतूलं परिकल्प्य तदुपरि ऐं क्लीं ह्सौं इति देवदेवीमूर्तिं प्रकल्प्यान्तर्यागपुरस्सरं बहिर्यागं आरभेत् । यथा -
ततो हृदि महाचक्रं बाह्योक्तप्रकारेण (परिभाव्य गणेशबटुकादिमूर्तिं प्रकल्प्य तां तां मानसैरुपचारैरभ्यर्च्य कुलकुण्डलिनीं मूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्धिभ्रूमध्यक्रमेण)षट्चक्रव्योम परतेजःसङ्गमय्याकुलामृतमहाम्बुधौ विश्रम्य (ततो बिन्दुदेशमानीय ह्स्त्रैं

Page 70

ह्स्क्लीं ह्सौः श्रीमहात्रिपुरसुन्दरि नमः । आवाहनविद्यया चक्रमध्यत्रिकोणान्तः श्रिपीठान्तर्निधापयेत्।)
महापद्मवनान्तस्थे कारणानन्दविग्रहे ।
सर्वभूतहिते मातोरेह्येहि परमेश्वरि ॥

अस्मिन् मण्डले श्रीमहात्रिपुरसुन्दरि सान्निध्यं कुरु कुरु नम इति त्रिखण्डामुद्रया हृदिस्थमूर्तावावाह्य वसन्तकामरक्षितनन्दनोद्यानमध्ये लीलागृहीतविग्रहां कामेश्वरीं कामेश्वराण्के पर्यङ्कासनसंस्थितां ध्यात्वा, एवं सर्वलक्षणसम्पन्नां सपरिवारां मानसेन विधिनाभ्यर्च्य परामृतकलया सन्तर्प्य पुनस्तां तेजोरूपतामभिनीय परमशिवसामरस्यमनुभाव्य स्वस्थानमानीयान्तर्मुद्रानवकं वक्ष्यमाणतत्तद्बीजैः परशक्तिविभ्रमरूपं परिभाव्य कुलामृतलोलीभूतचैतन्यम तां प्रवहणनाड्या त्रिखण्डामुद्रामुद्रितकरकमलकलितपुष्पाञ्जलौ विरेच्य पूर्वनिरूपितबाह्यमण्डलमूर्तावन्त

समावाह्य संस्थाप्य सन्निधीकृत्य सन्निरुध्यावकुण्ठ्य सकलीकरणामृतीकरणानि विधाय न्यासजातं देव्यङ्गे विन्यस्य सपरिवारां भगवतीं देवीं ध्यानपद्धत्युक्तलक्षणां

Page 71

परिभाव्य मुद्रानवकं प्रदर्श्यार्घ्याद्युपचारान् परिकल्पयेत् । यथा -

ऐं क्लीं सौः त्रिपुरसुन्दरि अर्घ्यं नम इति शिरसि सदूर्वं तण्डुलमर्घ्यं दत्त्वा तेन पादयोः पाद्यं नम इति पाद्यान्तेनाचमनीयं स्वधेति त्रिराचमनीयं पूर्ववत् । मन्त्रान्ते वौषडिति मुकुटोपरि पुष्पं मधुपर्कं सुधेति दधिमधुघृतात्मकं मधुपर्कमासादयित्वा पुनराचमनं नम इत्याचमनं नमस्कारान्ते कुङ्कुमाद्यनुलेपनधूपदीपनैवेद्यानि नमोऽन्तं बालामनुना दत्त्वा बाहुमालां च दत्त्वा वन्दनं विधाय स्नानार्थं विज्ञापनं कुर्यात् । रत्नपादुके च दत्त्वा स्नानमण्डपमुन्नीय सिंहासने समुपवेश्यार्घ्यादिवन्दनान्तं पूर्ववत् स्नानं कल्पयेत् । केशप्रशाधनाभ्यङ्गोद्वर्तनोष्णोदकपञ्चगव्यपञ्चामृताष्टगन्धोद्वर्तनसुगन्धामलकीफलोदकतीर्थोदकैर्मूलमन्त्राष्ट स्नानं परिकल्प्याङ्गकेशाङ्गप्रोद्वर्तनादिवस्त्रं दत्त्वाऽक्षतादर्शवन्दनाद्युपचारान् विधायांशुके परिधाव्य(प्य)रत्नपादुके दत्त्वा भूषणार्थं मण्डपान्तरमुन्नीय ततः सिंहासने समुपवेश्य श्रीमहात्रिपुरसुन्दरि मुकुटं कल्पयामी-

Page 72

त्यादिकुण्डलकेयूरमहारत्नच्छत्रवीरबाहुमालादि बालामनुना दत्त्वाऽर्घ्यादिवन्दनान्तानुपचारान् विधाय रत्नपादुके दत्त्वा प्रधानमण्डपमुन्नीय देवाङ्गे समुपविष्टां ध्यात्वाऽर्घ्यपाद्याचमनमधुपर्कपुनराचमनगन्ध विधायाऽष्टोत्तरशतं तदर्धसङ्ख्यया वा मुखकमले बिन्दुतर्पणं विधाय पूजार्घ्यमण्डलयोर्मध्ये ईकाराङ्कितत्रिकोणवृत्तचतुरस्रमर्घ्यमण्डलं विधाय हृक्प्रणवेनाभ्यर्च्य प्रतिपदादिपञ्चदश्यन्तं कामेश्वर्यादिनित्यानामेकैकं सम्पूज्य षोडश्या नित्यया मूलदेवीं सर्वस्मिन्(न्न)हनि सम्पूजयेत् ।

नित्या यथा - ऐं क्लीं ह्सौं इयं कामेश्वरीनित्या प्रथमा । अपरा तु ऐं क्लीं ह्सौः आं ईं ऊं ऐं यां रां लां वां सां कामेश्वरि इच्छाकामफलप्रदे सर्वसत्त्ववशङ्करि जगत्क्षोभकरे हुं हुं हुं ऐं द्रां द्रीं क्लीं ब्लूं सः ह्सौः क्लीं ऐं श्रीकामेश्वरीनित्याश्रीपादुकां पूजयामि इति वा प्रथमम् । ऐं ह्रीं सर्वकार्यार्थसाधनि वज्रेश्वरि वज्रपञ्जर-

Page 73

मध्यगते ह्रीं क्लिन्ने ऐं क्रों नित्यमदद्रवे ह्रीं वज्रनित्यायै नम इति वा वज्रेश्वरीनित्या । ऐं भगभुगे भ्गिनि भगोदरि भगमालिनि भगावहे भगगुह्ये भगयोनि भगनिपातिनि सर्वभगवशङ्करि भगरूपे नित्यक्लिन्ने भगस्वरूपे सर्वाणि भगानि मे ह्यानय आनय वरदे रेते सुरेते भगक्लिन्ने क्लिन्नद्रवे क्लेदय द्रावय अमोघे भगं विक्षोभय विक्षोभय द्रावय सर्वसत्त्वान् भगेश्वरि ऐं ब्लूं जं ब्लूं भें ब्लूं मों ब्लूं हें ब्लूं हें क्लिन्ने सर्वाणि भगानि मे वशमानय स्त्रीं ह्ब्लें ह्रीं भगमालिनीनित्याश्रीपादुकां पूजयामि । (द्वितीया नित्या) । ह्सैं ह्रीं हें नित्यक्लिन्ने मदद्रवे ऐं ह्रीं ह्सौः ऐं बीं जूं सः परामृतकलेश्वरि

इति प्रथमावरणं

## द्वितीयावरणं

अथ षोडशारे (वामावर्तेन)ऐं ह्रीं श्रीं अं कामाकर्षिणीनित्याकलादेवीश्रीपादुकां पूजयामि, आं बुद्ध्याकर्षिणीनित्याकला । इं अहङ्काराकर्षिणीनित्या । ईं शब्दाकर्षिणीनित्या । उं स्पर्शाकर्षिणीनित्या । ऊं रूपाकर्षिणीनित्या । ऋं रसाकर्षिणीनित्या । ॠं गन्धाकर्षिणीनित्या । ऌं चित्ताकर्षिणीनित्या । ॡं धैर्याकर्षिणीनित्या । एं स्मृत्याकर्षिणीनित्या । ऐं नामाकर्षिणीनित्या । ॐ बीजाकर्षिणीनित्या । औं आत्माकर्षिणीनित्या । अं अमृताकर्षिणीनित्या । अः शरीराकर्षिणीनित्याकला-

Page 79

देवीश्रीपादुकां । इति पश्चिमदलादारभ्य वायव्यान्त्यं(न्तं)पूज्याः । ऐं क्लीं सौः इति त्रिपुरेश्वरीनित्यापादुकां पूजयामीति मध्ये चक्रेश्वरीं पूजयेत् । एताः (समस्ताः)गुप्तयोगिन्यः सर्वाशापरिपूरके चक्रे समुद्रा । इत्यादि पूर्ववत् । द्रां सर्वविद्राविणीमुद्रां प्रदर्शयेत् ।

इति द्वितीयावरणं

## तृतीयावरणं

अथाष्टदले (ह्रीं श्रीं)कं ५ अनङ्गकुसुमादेवीश्रीपादुकां पूजयामि, ह्रीं श्रीं चं ५ अनङ्गमेखला । ह्रीं श्रीं टं ५ अनङ्गमदना । ह्रीं श्रीं तं ५ अनङ्गमदनारुता । ह्रीं श्रीं पं ५ अनङ्गरेखा । ह्रीं श्रीं यं ४ अनङ्गवेगा । ह्रीं श्रीं शं ४ अनङ्गाङ्कुशा । ह्रीं श्रीं क्षं अनङ्गमालिनीदेवीश्रीपादुकां । इति पूर्वादिचतुर्दिक्षु पुनराग्नेयादिषु च । ऐं क्लीं ह्सौः श्रीत्रिपुरसुन्दरीनित्यापादुकां इति मध्ये ह्रीं श्रीं एता गुप्ततरयोगिन्यः सर्वसङ्क्षोभणचक्रे समुद्रा । इत्यादि पूर्ववत् । क्लीं सर्वाकर्षिणीमुद्रां प्रदर्शयेत् ।

इति तृतीयावरणं

## चतुर्थावरणं

अथ चतुर्दशारे ह्रीं श्रीं सर्वसङ्क्षोभिणीशक्तिश्रीपादुकां । ह्रीं श्रीं सर्वविद्राविणीशक्ति । ह्रीं श्रीं सर्वाकर्षिणीशक्ति । ह्रीं श्रीं सर्वाह्लादिनीशक्ति । ह्रीं

Page 80

श्रीं सर्वसम्मोहिनीशक्ति । ह्रीं श्रीं सर्वस्तम्भिनीशक्ति । ह्रीं श्रीं सर्वजम्भिनीशक्ति । ह्रीं श्रीं सर्ववशङ्करीशक्ति । ह्रीं श्रीं सर्वरञ्जनीशक्ति । ह्रीं श्रीं सर्वोन्मादिनीशक्ति । ह्रीं श्रीं

सर्वार्थसाधिनीशक्ति । ह्रीं श्रीं सर्वसम्पत्तिपूरणीशक्ति । ह्रीं श्रीं सर्वमन्त्रमयीशक्ति । ह्रीं श्रीं सर्वद्वन्द्वक्षयङ्करीशक्तिश्रीपादुकां। । एताः पश्चिमादारभ्य वामावर्तेन पूज्याः । ह्रीं क्लीं सौः श्रीत्रिपुरावासिनीनित्या(श्री)पादुकां पूजयामि नम इति मध्ये चक्रेश्वरीं सम्पूज्य एताः सम्प्रदायक्रमयोगिन्यः सर्वसौभाग्यदायकचक्रे समुद्रा । इत्यादि पूर्ववत् । ब्लूं सर्ववशङ्करीमुद्रां प्रदर्शयेत् ।

इति चतुर्थावरणं

## पञ्चमावरणं

बाह्यदशारे सर्वसिद्धिप्रदादेवीश्रीपादुकां । सर्वसम्पत्प्रदादेवी । सर्वप्रियङ्करीदेवी । सर्वमङ्गलकारिणीदेवी । सर्वकामप्रदादेवी । सर्वदुःखविमोचिनीदेवी । सर्वमृत्युप्रशमनीदेवी । सर्वविघ्नविनाशिनीदेवी । सर्वाण्ग-

Page 81

सुन्दरीदेवी । सर्वसौभाग्यदायिनीदेवी। । एताः पश्चिमादारभ्य वामावर्तेन पूज्याः । हैं ह्क्लीं ह्सौः श्रीत्रिपुरश्रीनित्यापादुकां । इति मध्ये । एताः (समस्ताः)कुलकौलयोगिन्यः सर्वार्थसाधके चक्रे समुद्रा इत्यादि पूर्ववत् । सः सर्वोन्मादिनीमुद्रां प्रदर्शयेत् ।

इति पञ्चमावरणं

## षष्ठावरणं

अथान्तर्दशारे ह्रीं श्रीं सर्वज्ञादेवीश्रीपादुकां । ह्रीं श्रीं सर्वशक्तिमयीदेवी । ह्रीं श्रीं सर्वैश्वर्यप्रदा । ह्रीं श्रीं सर्वज्ञानमयी । ह्रीं श्रीं सर्वव्याधिविनाशिनी । ह्रीं श्रीं सर्वाधारस्वरूपिणी । ह्रीं श्रीं सर्वपापहरा । ह्रीं श्रीं सर्वानन्दमयी । ह्रीं श्रीं सर्वरक्षास्वरूपिणी । ह्रीं श्रीं सर्वेप्सितफलप्रदादेवीश्रीपादुकां। । एताः पूर्ववत् ह्सैं ह्स्क्लीं ह्सौः श्रीत्रिपुरामालिनीनित्या । इति मध्ये चक्रेश्वरीमाराध्य एताः (समस्ताः)निगर्भयोगिन्यः सर्वरक्षाकरे चक्रे समुद्रा । इत्यादि पूर्ववत् । अर्घ्योदकाक्षतकुसुमैरखिलचक्रेनायिकायै पूजां समर्प्य क्ॐ महाङ्कुशामुद्रां प्रदर्शयेत् ।

इति षष्ठावरणं

## सप्तमावरणं

Page 82

अथाष्टकोणे वशिन्याद्यष्टकन्यासोक्तमन्त्रैर्देवीपुरत आरभ्य वामावर्तेन पूज्याः । ह्रीं क्लीं ब्लें श्रीत्रिपुरासिद्धिदेवीश्री । इति मध्ये । एताः (सर्वाः)रहस्ययोगिन्यः सर्वरोगहरे चक्रे समुद्रा । इत्यादि पूर्ववत् । अर्घ्यादिकाक्षतकुसुमैरखिलनायिकायै पूजां समर्प्य ह्स्ख्फ्रें इति खेचरीमुद्रां प्रदर्शयेत् ।
इति सप्तमावरणं

## अष्टमावरणं

अथाष्टकोणत्रिकोणान्तरालचतुष्के (पश्चिमादारभ्य वामावर्तेन बाणपूजां कुर्यात्।)ह्रीं श्रीं यां रां लां वां सां ऐं द्रां द्रीं क्लीं ब्लूं सः यां रां लां वां सां जम्भनेभ्यः कामेश्वरबाणेभ्यो नमः । ह्रीं श्रीं ऐं द्रां द्रीं क्लीं ब्लूं सः यां रां लां वां सां ऐं द्रां द्रीं क्लीं ब्लूं सः जम्भनेभ्यः कामेश्वरीबाणेभ्यो नमः । (ह्रीं श्रीं)यां रां लां वां सां ऐं द्रां द्रीं क्लीं ब्लूं सः धां सम्मोहनाय कामेश्वरचापाय नमः । ह्रीं श्रीं द्रां द्रीं क्लीं ब्लूं सः यां रां लां वां सां थां सम्मोहनाय कामेश्वरीचापाय नमः । एवं सर्वत्र योज्यम् । आं वशीकरणाय कामेश्वरपाशाय नमः । ह्रीं वशीकरणाय कामे-

Page 83
श्वरीपाशाय नमः । क्रॐ स्तम्भनाय कामेश्वराङ्कुशाय नमः । क्रॐ स्तम्भनाय कामेश्वर्यङ्कुशाय नम इति पश्चिमादारभ्य प्रादक्षिण्येन पूज्याः । अथान्तस्त्रिकोणाग्रदक्षवामकोणेषु कामेशर्यादिदेवीत्रयं न्यासोक्तपीठमन्त्रैः सम्पूज्य ह्सैं ह्स्क्लीं ह्सौः श्रीत्रिपुराम्बानित्याश्रीपादु । इति मध्ये (चक्रेश्वरीमाराध्य)एता अतिरहस्ययोगिन्यः सर्वसिद्धिमये चक्रे समुद्रा । इत्यादिना मूलदेव्यै पूजां समर्पयेत् । अर्घ्योदकाक्षतकुसुमैरखिलचक्रनायिकायै पूजां समर्प्य ह्सौं बीजमुद्रां प्रदर्शयेत् । अत्राणिमाद्यारभ्य त्रिकोणान्तपरिवारदेवतानां मूलदेवतावद् ध्यानं द्रष्टव्यम् । तच्च न्यासपटले प्रदर्शितमेव द्रष्टव्यम् ।
इत्यष्टमावरणं

## नवमावरणं

तत्त्रिकोणमध्ये तुर्यपीठमनुना मूलदेवीं समाराध्य तुर्यबीजमुच्चार्य त्रिपुरभैरवीनित्या । इति स्वामिनीबुद्ध्यापि तामेवाराध्य एताः (समस्ताः)परापरातिरहस्ययोगिन्यः सर्वानन्दमये महाचक्रे बैन्दवे परब्रह्मस्वरूपिणि परामृतशक्तिसर्व-

Page 84
चक्रेश्वरि सर्वमन्त्रेश्वरि सर्वविद्येश्वरि सर्वपीठेश्वरि सर्वयोगेश्वरि सर्ववागीश्वरि सर्वसिद्धेश्वरि (सर्वकामेश्वरि सर्वसत्त्वेश्वरि त्रैलोक्यमोहन)जगदुत्पत्ति(स्थिति)मातृकासने चक्रासने च तासां

ततो भगवत्यै पुष्पाञ्जलिं दत्त्वा सकलीकृत्य मुद्रानवकं प्रदर्श्य श्रीमहात्रिपुरसुन्दरि पराङ्मुखार्घ्यः स्वाहेत्यर्घ्यं दत्त्वा श्रीपात्रं संशु(शो)ध्य वारचतुष्टयं निवेद्यार्घ्यदेवता देवाङ्ग-

Page 98

शृङ्गाटोदरं नीत्वा बाह्याभ्यन्तरभेदेन कामकलाध्यानं “बिन्दुं सङ्कल्प्य” (नि. षो. १.१८५)इत्यादि सुत्रोक्तं यथाविधि विदध्यात् । खेचरीमुद्राबन्धेन सह यावन्मनोलयस्तावदकुलशृङ्गाटे उन्मनीभूय तिष्ठेत् । तदुक्तं श्रीक्रमस्तोत्रे -

चिदङ्कुरं कामकलास्वरूपं बिन्दुं विगाल्यामिततेजसेद्धम् ।
अनाहतोन्मेषनिनादवृत्तिचक्रस्थितं जन्मबिलान्तराले ॥

तस्याधरस्थं शशिसूर्यरूपं बिन्दुद्वयं पार्श्वयुगप्रवाहम् ।
तस्याप्यधो वह्निशिखाग्रभागं रेखाकृती द्वे प्रविलाप्य सम्यक् ॥

इति ततो मूलविद्याबीजत्रयैस्तत्त्वत्रयान्तैः स्वाहान्तैः प्रसादं स्वीकृत्य कुमारी(बटुका)वर्चयेत् । ऐं ह्रीं (इति)कूमारीमन्त्रः । ह्रीं ऐं (इति)बटुकमन्त्रः । त्रिकोणवृत्तचतुरस्रं मण्डलं कुमारीबटुकयोः पुरस्ताद् विधाय षड्वरभेदेन

————————-

देवताङ्गे विलीनाः सन्त्विति विलाप्यात्मानं कामकलात्मकं ध्यात्वा खेचरीमुद्रया क्षमस्वेति तां भगवतीमकुल(गव?)शृङ्गाटोदरगतां कृत्वा तेनैव मार्गेणाधारे विसर्जयेत् । अथैशान्यां त्रिकोणं भूमण्डले ३ त्रिपुरसुन्दरि शोषिकाभ्यो नम इति शोषिकाः सम्पूज्य ताभ्यो निर्माल्यमन्त्रेण निर्माल्यं ददेत् । निर्माल्यमन्त्रो यथा -

ऐं लेह्यचोष्यान्नपानादिताम्बूलं स्रग्विलेपनम् ।
निर्माल्यभाजनं तुभ्यं ददामि श्रीशिवाज्ञया ॥

Page 99

ह्रीङ्कारेण मण्डलं सम्पूज्य साधारं पात्रं प्रतिष्ठाप्यार्घ्यप्रतिष्ठावत् प्रतिष्ठितकलशं दिव्येन सद्वितीयेनापूर्य तत्र स्वस्वमन्त्रान् विन्यस्य (वि)शेषार्घ्यबिन्दुं निक्षिप्य (सु)वस्त्रासनं पुष्पगन्धताम्बूलाद्यैर्भक्ष्यभोज्यलेह्यचोष्यचर्व्यखाद्यैर्मधुमांसभेदैश्च सिद्धान्नादिभिश्च सदीपैस्तानर्चयित्वा पादवन्दनं विधाय त्रिः पाययित्वा चक्रदेवतासङ्ख्यया चतुष्षष्टिसङ्ख्यया वा द्वात्रिंशद्वाष्टाष्टचतुःसङ्ख्यापर्यन्तं यथाशक्ति पादप्रक्षालनाद्यर्घ्यप्रतिष्ठापुरःसरं वित्तशाठ्यं विना योगिनीचक्रं नित्यपूजान्ते ह्यन्वहमर्चयित्वा त्रिः पात्रं कारयित्वा परमेश्वरीभक्तिमभिप्रार्थ्य तदनुज्ञातो मूलविद्याबीजत्रयं तुरीयबीजान्तैस्तत्त्वचतुष्टयान्तैः स्वाहान्तैः (श्री)गुरुध्यानपुरस्सरमन्तःशक्तिमुत्थाप्य समरसीभावं नीत्वा तच्छिखायां पात्रचतुष्टयं नीत्वा श्रीगुर्वाज्ञया चक्रराजपुरस्सरं बलिं बहिर्विसृज्य देवी पूजा नित्यं निर्विघ्नेन भवितव्येत्यभिप्रार्थ्य पुनः समयपात्रमवलोक्य नैवेद्यादिकं

वामावर्तेन तच्चक्रेश्वरीं त्रिपुरेश्वरीं नित्यां पूर्ववत्तच्चक्रव्यापिनीं स्मृत्वा तत्समर्पणमन्त्रेण परामृतास्रावं कृत्वा तदभ्यन्तरे तत्रैवाष्टदलपद्मं पद्मरागोपमं सञ्चिन्त्य ललाटाग्राभ्यन्तरे पूर्वाद्याग्नेयादिदिग्विदिक्ष्वनङ्गाद्यष्टरश्मिकदम्बकं बाह्योक्तमन्त्रैः स्मृत्वा तच्चक्रेश्वरीं त्रिपुरसुन्दरीं नित्यां तत्समर्पणमन्त्रं च स्मृत्वा बिन्दुमध्यं भ्रूचक्रं प्रविश्य चतुर्दशदेवीं चक्रेश्वरीं तच्चक्रसमर्पणं तत्पृष्ठादिवामावर्तेन कृत्वा लम्बिकायां कण्ठे चक्रदशद्वन्द्वं पूर्ववत् कृत्वा हृत्कमले त्वष्टास्रचक्रे पुरत आरभ्य

——————-

अथ पूजा यथा - अथ रत्नावल्यां कथितत्रिखण्डमुद्रया कुलकुण्डलिनीमुत्थाप्य षोडशान्तर्गतसर्वानन्दमये बैन्दवे महापीठे समावाह्य तत्रोक्तमुद्रानवकं प्रदर्श्य मानसैरुपचारैराराधयेत् । उक्तं हि -

Page 102

वामावर्तेन वशिन्याद्यष्टकं तच्चक्रेश्वरीं तत्समर्पणमन्त्रं स्मृत्वा नाभिचक्रे त्रिकोणे पुरस्तादारभ्य कामेश्वर्यादिदेवीत्रयं तच्चक्रेश्वरीं प्रादक्षिण्येन स्मृत्वा तत्समर्पणमन्त्रेण समर्प्य च मेढ्राधारे मूलविद्यया समस्तया तुरीयपीठमन्त्रेण कुलकुण्डलिन्यां स्मृत्वा तच्चक्रेश्वरीतुरीयबीजरूपां स्मृत्वा परामृतचुलुकोदकेन तत्समर्पणमन्त्रं समरन् पूजां समर्प्याध्युष्टकोटिरोमनिचये एकैकरोम प्रत्यष्टाष्टकं शृङ्गाटकं स्रवदमृतक्लिन्नं स्मृत्वा चतुष्षष्टिलक्षकोटिमहायोगिनीश्रीपादुकां पूजयामीति प्रपूज्य मूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्धिकण्ठलम्बिकाभ्रूमध्यान्तं नित्याष्टकं भ्रूमध्यादुपरि ह्यवशिष्टनित्याष्टकमाद्वादशान्तं प्रतिगृह्यैकैकं सम्पूज्य पूजापूर्त्यर्थं तुरीयसमयविद्यां परामृतवाहिनीं तत्रैव स्मृत्वा शक्तिपञ्चकचतुर्वह्निभिर्द्राव्यद्रावकभावेन स्वशरीतं यान्य(व?)र्णवरूपमकुलामृतकलया पद्मरागमय्या कोटिचन्द्रसुशीतलया त्वापूर्य तस्मिन् परामृतहृदये स्वविमर्शशक्तिं स्वात्मैक्येनाद्यवर्णरूपनिश्शेषबीजगर्भगां कृत्वा परानन्दानुभवात्मकस्तिष्ठेत् ।

————-

उत्थाप्य खण्डत्रितयेन मुद्रया भवार्णवध्वंसकरीं पुरातनीम् ।
सौषुम्नमार्गे शवमूलविद्यया गले महापीठमये च तां नयेत् ॥

आधायेद्(वाहयेद्)यथापूर्वमुपचारैः पृथक् पृथक् ।
मानसैर्गन्धपुष्पाद्यैः पूजयन् योगिनां सदा ॥

Page 103

ततः पार्थिवगुणं सौगन्ध्यमशेषं गन्धपुष्पधूपभावेन समर्प्याग्नितत्त्वगुणमखिलप्रकाशं दीपमालाकर्पूरारार्त्रिकं दत्त्वाऽप्यगुणमशेषं सरसमन्नभक्ष्यभोज्यदाइकं निवेद्य वायुतत्त्वगुणस्वशरीरचेष्टितं प्रदक्षिणनमस्कारं परिकल्प्याऽकाशतत्त्वगुणशब्दघण्टादिनानावाद्यं परिकल्प्य (बुद्धिविभ्रमरूपा

वृत्तीर्नृत्यगीतं परिकल्प्य)मनोबुद्ध्यहङ्कारान् पशून् सरागादिकान् निशस्य तच्छोणितधारया परमेश्वरीं परितोष्य ज्ञानखड्गेन मलमायाकर्माख्यान् मगान् क्षयं नीत्वा तदाममांसं बहुविधं परमेश्वर्यै निवेद्य कपालचन्द्रशृङ्गाटोदरगलितां मद्यधारां (अविच्छिन्नां)देव्यै समर्प्य स्वयं विमर्शशक्त्या शृङ्गाटोदरगतया बिन्दौ परमाद्वयपदे समरसीभूय पूजामनवरतं तन्वन् आनन्दमयो भवेदित्यन्तःपूजा ।

॥ इति (श्रीविद्यानन्दनाथविरचितायां श्रीत्रिपुरसुन्दरीपद्धत्यां ज्ञानदीपविमर्शिन्यां)पूजापद्धतिस्त्रयोदशी ॥

——————————

उपचाराश्च यथा - भुमिर्गन्धः, आकाशः पुष्पम्, वायुर्धूप, तेजोः (दीपम्), जलं नैवेद्यम्, स्वशरीरचेष्टाः प्रदक्षिणं नमस्कारं परिकल्प्य शब्दं घण्टादि प्रतिभाव्य बुद्धिनर्तकीं परिकल्प्य

Page 104

# मुद्रापद्धतिः

अथ मुद्रोद्धारो यथा बाह्याभ्यन्तरभेदेन । बाह्या सर्वसङ्क्षोभिण्यादियोनिमुद्रान्तास्तत्तद्बीजैः सह प्रतिचक्रमेकैकाः पूजायां करविरचने निदर्शनीयाः । त्रिखण्डा त्वावाहनार्थमेव (विनियुक्ता) । द्रां द्रीं क्लीं ब्लूं सः क्रॐ ह्स्ख्फ्रीं ऐं इति मुद्राबीजानि । रचनाप्रकारस्त्वस्माभिः कृतायामर्थरत्नावल्यां मुद्रापटलव्याख्याने द्रष्टव्यः ।

अभ्यन्तरे योनिमुद्रां योजयेत् । मेढ्राधारनाभिहृदयकण्ठलम्बिकाभ्रूमध्याष्टपद्मषोडशदलचतुरस्त्रनवाधारेषु पूर्वोक्तबीजानि वाग्भवादीनि सहजबीजान्तानि स्मरन् कुलशक्तिविभ्रमं भावयेत् । योगिनामान्तरमुद्राः ।

॥ इति विद्यानन्दविरचितायां श्रीत्रिपुरसुन्दरीपद्धत्यां ज्ञानदीपविमर्शिन्यां मुद्रापद्धतिश्चतुर्दशी ॥

Page 105

# होमपद्धतिः

अथ होमः । तत्र बाह्यो यथा - सुलक्षणे योनिकुण्डे भगाङ्कचतुरस्त्रार्धचन्द्रवृत्तित्रिकोणादिकुण्डानामन्यतमं कार्यानुरूपेण कुण्डं साधयेत् । तत्र चतुरस्त्रयोनिकुण्डादीनां लक्षणमुच्यते । यथा - चतुरस्त्रं समं ततो हस्तमात्रं प्रमाणं पञ्चदशाङ्गुलखातं (च) । तन्मध्येऽङ्गुलैकं निर्गत्याङ्गुलैकोच्छ्रितकण्ठं कण्ठोपरि नवाङ्गुलोच्छ्रिता मेखला । मेखला च प्रथमा षडङ्गुलविस्तारा । तस्यामङ्गुलद्वयं लम्बित्वा चतुरङ्गुलविस्तारा द्वितीया मेखला, तस्याप्यङ्गुलद्वयं लम्बित्वा द्व्यङ्गुलविस्तारा तृतीया मेखला । इत्थं त्रिमेखला हस्तप्रमाणाद् बहिर्बहिः कर्तव्या । तत्पश्चिमपार्श्वमध्ये

द्वादशाङ्गुलदीर्घा अष्टाङ्गुलविस्तारा योनिः कर्तव्या । एकमेखलापक्षेऽष्टादशाङ्गुलं खातम्, तत्र चैकाङ्गुलः कण्ठः षडङ्गुलोच्छ्रिता मेखला चतुरङ्गुलविस्तृता योनिः । प्राग्वदङ्गुलौ काष्ठकण्ठौ । कुण्डाभ्यन्तरमुखा किञ्चिदवनता अश्वत्थपत्रवद् योनिः । एवं लक्षणयुक्तं त्रिकोणाद्याकारं वा कुर्यात् । इत्थं देव्यास्त्वीशानभागे कुण्डं कुर्यात् । तत्र उल्लेखनप्रोक्षणादिसंस्कृते हसन्त्यां भूमौ वा चतुरस्रत्रिकोणाङ्कितायां मूलविद्यामुच्चार्य

Page 106
कुण्डाय नम इति कुण्डं सम्पूज्य ऋतुमतीं कामेश्वरीं सकामां ध्यात्वा समावाह्य मूलविद्यया समभ्यर्च्यारणेः सूर्यकान्तात् कुलाष्टकरूपवेश्यादिगृहाद्वा पुष्पितस्त्रीसुभगानामन्यतमस्या गृहाद्वा विशेषतः । अथवा द्विजातिगृहाद्वा स्वगृहाद्वा वह्निमानीय वौषडन्तमूलविद्याभिमन्त्रिताभ्यां लोचनाभ्यामवलोकनमग्नेरस्त्रमन्त्रेण ताडनं हुफडन्तेन क्रव्यादंशपरित्यागः । कवचमन्त्रेण सम्पूज्य कुण्डस्योपरि प्रदक्षिणं त्रिधा परिभ्रम्य जानुभ्यामवनीं गत आत्मनः सम्मुखं कृत्वा कुण्डे स्थापयेत् । क्लीं वह्निमूर्तये नम (इत्यग्निमभ्यर्च्य)कामेश्यां गर्भनाड्यां वामनाड्यां प्राणपूरणपुरस्सरं मूलमध्येनाग्निं संहारमुद्रयान्तःसमाकृष्य बैन्दवोदराग्निना समरसीकृत्योद्भवमुद्रया कामराजेनैव दक्षिणनाड्या रेचकेन मूलमध्यानन्तर वह्निचैतन्याय नमः । इत्थं तेन कामेशीगर्भनाड्यां प्रतिष्ठाप्य ज्वालिनीमुद्रां प्रदर्श्य मूलषडङ्गेनाग्निषडङ्गेन च पूजयेत् तमग्निम् ।
यथा - सहस्रार्चिषे हृदयाय नमः । स्वस्तिपूर्णाय शिरसे स्वाहा । अन्तस्थपुरुषाय शिखायै वषट् । धूमव्यापिने कवचाय हुं । सप्तजिह्वाय नेत्रत्रयाय वौषट् । धनुर्धराय अस्त्राय फट् - इत्यग्निषडङ्गनि । वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहेत्यग्निमन्त्रेण

Page 107
शक्तिस्वस्तिकवरदाभयधारिणं कनकवर्णं कनकमालालङ्कृतं वह्निं सम्पूज्य तन्मध्ये जिह्वासप्तकबीजविन्यासं विदध्यात् । यथा - अग्निमुखे षट्कोणं विलिख्य ऐं स्र्यूं पद्मरागायै तप्तचामीकरवर्णायै हिरण्यायै नमः । मध्ये शाङ्करकोणे ऐं ख्र्यूं सुवर्णायै सूर्यवर्णायै गगनायै नमः । ऐन्द्रकोणे ऐं स्र्यूं रुद्रलोहितायै प्रोद्यदादित्यवर्णायै रक्तायै नमः । वह्निकोणे ऐं ह्यू लोहितायै नीलवर्णायै नमः । ततस्तदग्निहृदये देवीं सपरिवारां सम्पूज्य तदनन्तरं रक्तश्वमारपुष्पाणि सिताज्यक्षीरसंयुतानि केवलाज्यहोमपूर्वकं मूलविद्यया नैर्ऋत्यकोणे ऐं ब्र्यूं श्वेतायै मुक्तामणिवर्णायै सुप्रभायै नमः । पश्चिमकोणे ऐं प्रूं धूमिन्यै पद्मरागवर्णायै अतिरक्तायै नमः । वायव्यकोणे ऐं ष्ट्यं कराल्यै चन्द्रकोटिप्रभायै बहुरूपायै नमः । एतदनन्तरं कुण्डमध्ये देवीं समभ्यर्च्य पूर्ववत् सपरिच्छदामिति गर्भनाड्या स्थापितस्य मन्त्रसंस्कृतवह्नेस्तोयबिन्दुं दत्त्वा

Page 108
सदिन्धनैराच्छाद्य गर्भरक्षार्थमस्त्रजप्तदर्भकङ्कणं देवीहस्ते बध्वा गर्भाधानार्थं मूलविद्यया

मूलस्वामिनीमभ्यर्च्य प्रथमबाणेनाहुतित्रयं दत्त्वा रक्ताश्वमारपुष्पाणि सिताज्यक्षीरसंयुतानि जुहुयात् त्रिधा । ततः पुंसवनार्थं मूलविद्यया मूलस्वामिनीं सम्पूज्य द्वितीयबाणेनाहुतित्रयं हुत्वा ततः सीमन्तोन्नयनार्थं मूलविद्यया मूलस्वामिनीं समभ्यर्च्य तृतीयबाणेनाहुतित्रयं हुत्वा ततो मूलविद्ययाभिमन्त्रितकुसुमेन चक्राङ्गकल्पनं कुर्यात् । गर्भनिष्क्रामणं च विधाय तदर्थं मूलविद्यया देवीं समभ्यर्च्य चतुर्थबाणेनाहुतित्रयं हुत्वा नामकरणार्थं मूलस्वामिनीं सम्पूज्य पञ्चमबाणेनाहुतित्रयं हुत्वा कामाग्निस्त्वं हुताशन इति नाम विधाय ततो मेखलासु रक्षार्थं ब्राह्म्यादिकं सम्पूज्य कुलिशाद्यस्त्राणि च वज्रशक्तिदण्डखड्गपाशध्वजगदाशूलपद्मचक्राणि । ब्राह्म्यादीनामनन्तरं दिक्षु कामबीजेन कामं सम्पूज्य पूर्वे दक्षिणस्यां वसन्तं पश्चिमायां रतिं उदीच्यां प्रीतिमिति । ततश्चन्दनादिसुगन्धकाष्ठैर्धूपदीपार्थं वह्निमुद्धृत्य कुण्डान्तरे धारणीयम् । यथाशक्ति नित्यहोमं जुहुयात् ।

Page 109

काम्यार्थी मूलग्रन्थोक्तमल्लिकाजात्यादिद्रव्यैर्जुहुयात् । पुरश्चरणार्थी मन्त्रदशांशं पलाशपुष्पैर्जुहुयात् । परिवाराणां चैकैकशः पश्चादन्नपानभक्ष्यभोज्यलेह्यचोष्यताम्बूलादिकं नैवेद्यार्थमस्मिन् जुहुयात् । ततो देव्याः करोद्वर्तनादिकं सङ्कल्प्य स्रुचमापूर्य स्रुक्स्रुवं सम्बद्धं कृत्वा तदनूत्थाय ऋजुकायो भूत्वा स्वनाभिमूले स्रुक्स्रुवादि कृत्वा पूर्णाहुतिं हुत्वा मूलविद्यया आज्यधारामविच्छिन्नां पूर्णाहुत्यर्थं क्षिपेत् । ततो देवीं विसृजेत् । सापेक्षं पूजाचक्रं गच्छेदिति । ततो व्याहृतिं हुत्वा भस्म धारयेत् । नाडीसन्धानेन वह्निस्थां देवीं ब्रह्मरन्ध्रे(ब्रह्मरन्ध्रेषु) परदेव्यां वा संयोज्य वह्निमन्त्रात् संहृत्य द्वादशान्तं नीत्वा हृदि निवेश्य वह्निं विसृज्य प्रस्तररूपदर्भमालामुद्वास्य मेखलासु स्थितान् मन्त्रान् समाकृष्य निवेद्य कालदन्तं त्रिविधबलिमन्त्रान् हृदि कृत्वा सम्यग् देवीमुपेत्य पुनर्धूपेन सन्धूप्यार्घ्यपुष्पादिकं दत्त्वा साष्टाङ्गं प्रणम्य अर्घ्यपात्रस्थद्रव्यचुलुकत्रयेण जपहोमौ देव्यै निवेदयेत् ।

अथान्तरहोमो यथा - नाभिकुण्डकुण्डलिनीचिदग्नौ देवीमये रावरौद्रप्रयोगलब्धपरमामृताज्येन सहाक्षवृत्त्याख्यद्रव्याणि सप्तावृत्त्या जुहुयात् ।

Page 110

ॐ धर्माधर्महविर्दीप्तामात्माग्नौ मनसा स्रुचा ।
सुषुम्नावर्त्मना नित्यमक्षवृत्तिं जुहोम्यहम् ॥

स्वाहेति मूलमन्त्रपूर्वकोऽयमाभ्यन्तरहोममन्त्रः ।
प्रकाशाकाशहस्ताभ्यामवलोक्योन्मनीस्रुचा ।
धर्माधर्मकलास्नेहपूर्णां वह्नौ जुहोम्यहम् ॥

स्वाहेति मूलमन्त्रपूर्वकेनै(णै)तेन पूर्णाहुतिं दद्यात् । तदुक्तं सङ्केतपद्धत्यां -

आभ्यां रावाख्यरौद्राभ्यामान्त्यं यस्मिन्ननामके ।
तद्दृष्ट्या तद्बलेनाशु लभ्यते न कथाक्रमैः ॥

मन्त्रमुद्रानिरीहः सन्नज्ञानं येन केनचित् ।
तपदग्नौ हुनेदिद्धे भावप्रा(वा)तं हविर्महत् ॥

चित्तवृत्तिसमायुक्तामेनां पूर्णाहुतिं क्षिपेत् ।
एष होमवरः श्रेष्टः समिदाज्यादिवर्जितः ॥

॥ इति श्रीविद्यानन्दनाथविरचितायां श्रित्रिपुरसुन्दरीपद्धत्यां ज्ञानदीपविमर्शिन्यां होमपद्धतिः पञ्चदशी ॥

Page 111

## जपपद्धतिः

अथ जपलक्षणं त्रिभेदं - मानसमुपांशुर्वाचिकं चेति । तत्रोपांशुवाचिकौ कर्मयोगिनाम् । तल्लक्षणमुक्तं श्रीसिद्धनाथपादैः -
उपांशुर्निजकर्णैकगोचरः सिद्धिदायकः ।
सुस्पष्टवचनोच्चारो वाचिकः सुविशुद्धिदः ॥ इति ॥

मानसस्तत्त्वमुद्राप्रयोगेण शक्तिधाराचारेण । तदुक्तं -
उच्चारो मनसा स्थानध्यानवर्ण(प्र)कल्पनात् ।
इत्यादिना । तेषां फलाधिक्यमपि शतलक्षकोटिभेदेनोत्तरोत्तरवैशिष्ट्यं मूलागमेषु द्रष्टव्यम् ।
॥ इति जपपद्धतिः षोडशी ॥

Page 112

## अक्षमालापद्धतिः

अथाक्षमालालक्षणं बाह्याभ्यन्तरभेदेन निरूप्यते । मुक्ताफलमणिस्फितवैदूर्यप्रवालपद्मरागरक्तचन्दनरुद्राक्ष
यथाकामं रक्तसूत्रप्रोतानि मृगनाभिकर्पूरकुण्डगोलोद्भवमिश्रप्रथमार्तवभावितानि मूलविद्याजप्तानि सप्तविंशत्यष्टाविंशत्त्रिंशदष्टपञ्चाशदष्टोत्तरशतानि शतानि वा शुभेऽहनि समाहृत्याक्षमाला कार्या । तयाक्षमालया यथोक्तमुद्रया जपं कुर्यात् ।
यथा मध्यमाङ्गुलिमध्यपर्वणि मालां निधाय ज्येष्ठाङ्गुलिमध्यपर्वणाकर्षणं गृहस्थानाम् । आभ्यन्तरा तु कुण्डलीसूत्रप्रोतानि हसमनुभूषितानि अनुलोमविलोममातृकाक्षराणि शतसङ्ख्यानि वर्गाष्टकसमेतान्यष्टोत्तरशतानि भवन्ति ।

कार्य(ः)प्राणसमो जपः स्फुटतरोच्चारक्रमात् कारयेत्
पञ्चाशन्मणिमालिका कुलवधूसूत्रं च बन्धुः कुजा ।

Page 113
मेरु(ः)सोऽपि लयान्तकोऽपि पिहितो मेरो(र्)विनोल्लङ्घयेद्
एवं निश्चललक्षजापनिरतः सिद्धो भवेत् खेचरः ॥

अक्षमालापद्धतिः सप्तदशी ॥

Page 114

## स्तोत्रपद्धतिह्

अथ स्तोत्रजपप्रकारः -
किं किं दुःखं दनुजदलिनि लीयते न स्मृतायां
का का कीर्तिः कुलकमलिनि ख्याप्यते न स्तुतायाम् ।
कं कं योगं सुरवरनुते नाप्नुवन्त्यर्चितायां
का का सिद्धिस्त्वयि न चिनुते चित्तमालम्बितायाम् ॥ १॥

सर्गसंसर्गसंरम्भस्फारिताद्यौघविभ्रमे ।
चिच्चन्द्रमण्डलान्तस्थे नमस्ते हरवल्लभे ॥ २॥

जगदाह्लादनोद्योतयोगभोगवियोगिनि ।
स्थितिलाभस्थिते देवि नमः स्थाणुप्रियेऽम्बिके ॥ ३॥

भावाभावपृथग्भावस्वभावोदयधर्मिणि ।
चैतन्यपञ्चके देवि नमस्तुभ्यं वराङ्गने ॥ ४॥

Page 115
ष्रिष्टिस्थित्युपसंहारप्रत्युज्झितपदोदये ।
चिद्विश्रान्तिमहासत्तामात्रे मात्रे नमोऽस्तु ते ॥ ५॥

वह्न्यर्कशीतकिरणे ब्रह्मचक्रान्तरोदिते ।
चतुष्पीठेश्वरि शिवे नमस्ते त्रिपुरेश्वरि ॥ ६॥

चराचरमिदं विश्वं प्रकाशयसि शाम्भवि ।
मातृकारूपमास्थाय तस्यै मातर्नमोऽस्तु ते ॥ ७॥

स्मृता भवभयं हंसि पूजिता शिवशङ्करि ।

स्तुता त्वं वाञ्छितं वस्तु ददासि करुणापरे ॥ ८॥

भक्तस्य मे नित्यपूजायुक्तस्य समनन्तरम् ।
वाग्भवादिमहासिद्धिं देहि त्रिपुरसुन्दरि ॥ ९॥

परमानन्दसन्दोहप्रमोदभरनिर्भरे ।
दुःखत्रयपरिम्लानवदनं त्राहि मां शिवे ॥ १०॥

शब्दब्रह्ममये स्वच्छे देवि त्रिपुरसुन्दरि ।
यथाशक्ति जपं पूजां गृहाण मदनुग्रहात् ॥ ११॥

द्रव्यहीनं क्रियाहीनं मन्त्रहीनं च यद्भवेत् ।
तत्सर्वं कृपया देवि क्षमस्व परमेश्वरि ॥ १२॥

Page 116

द्वैताद्वैतमहामोहशर्वरीक्षपणक्षमः ।
भास्वानिव जयत्येको गणेशो भूतिसंयुतः ॥ १३॥

प्रतिभायाः परोल्लासो निशाकर इवापरः ।
मूर्तियुक्तः स जयति बटुकस्ताण्डवान्वितः ॥ १४॥

षट्त्रिंशत्तत्त्वविभवं क्षेत्रं यः पालयत्यलम् ।
क्षेत्रेशं तमहं नौमि ताण्डवस्थं महालयम् ॥ १५॥

चतुष्पीठनिवासिन्यो योगेश्वर्यो महबलाः ।
चतुष्षष्टिप्रकारास्ता नित्यं वन्दे कुलाङ्गनाः ॥ १६॥

भेदाभेदमहामोहविवर्तपरिमण्डिताम् ।
आपूरयन्तीं समयां त्रिशार्णां तां नमाम्यहम् ॥ १७॥

—————————

## ख. पाठः

यन्मया क्रियते कर्म जाग्रत्स्वप्नसुषुप्तिषु ।
तत्सर्वं तावकी पूजा भूयाद् भूत्यै च मे शिवे ॥

यन्मयोक्तमिहाज्ञानात् तन्महत् स्वल्पमेव वा ।
हन्त! सर्वं जगद्धात्रि क्षन्तव्यमयमञ्जलिः ॥

Page 117

षोडाश्द्वादशनवसङ्ख्याधारग्रन्थि तत्पुर्यष्टकाभिप्रयेण स्वरैः षोडशभिरनपुंसकैर्द्वादशभिर्वर्गाद्यैः सक्षकारैर्नवभिः स्वगुणसङ्ख्याकैरङ्गुलैः प्रतिपर्वमानं वा पवित्रत्रयं कुर्यात् ।
गणेशक्षेत्रपालाभ्यां नवतन्तुतत्तुल्यग्रन्थिमणिबन्धप्रमाणगुरुणां (सिद्धानां)समं नवतन्तुतत्समं ग्रन्थित्र्यङ्गुलीमात्रं प्रतिगुरु (प्रतिसिद्धं)पवित्रकम्, अथवैकमेव सर्वत्र बोद्धव्यम् । आसनषट्कस्य प्रत्येकं कण्ठमनुग्रन्थ्यङ्गुलं चतुरङ्गुलस्थानां सिद्धब्रह्मादिमुद्राणामष्टतन्तु तावता ग्रन्थ्यङ्गुलं च कुर्यात् ।

Page 126

षोडशकलाद्यष्टत्रिकोणान्तचक्रदेवतानां स्वचक्रसङ्ख्या सूत्रादि कार्यम् । तत्र चक्रेश्वरीणां चैकाधिकं तन्त्वादिपवित्रकं कार्यम् । कामेश्वर्यादिदेवीत्रयस्य प्रत्येकं द्वादशतन्त्वादिकं मुख्यदेव्यास्तु उत्तमादिक्रमेण चतुष्षष्ट्यष्टत्रिंशत्सप्तविंशतितन्त्वादि पूर्वोक्ताभिप्रायेण कुर्यात् । मध्यचक्रेश्वर्या मूलदेवतावद्देव कार्यम् । गङ्गावतारकमष्टोत्तरशतचतुःषष्टिचतुःपञ्चाशत् तन्त्वादि विधाय आचार्यस्य सप्ततन्तूपवीतमानं यथाशोभं ग्रन्थि विरच्य तथैव साधकसामयिकानाम्, किन्तु साधकस्य पञ्चतन्त्वादि, सामयिकानां त्रितन्त्वादि (बटुकादि)बलित्रयस्य नवतन्त्वादि कार्यम् । अग्निस्थापनं प्राग्वत् । सर्वासामथवा मुख्यदेव्या एकमेव । ततः कलशाष्टकवारिधानीदेवीकुम्भानां सप्तविंशतिद्वादशनवतन्त्वादि कार्यम् ।
ततोऽधिवासनवासरेऽस्त्रमन्त्रेण मण्डपं त्रिसूत्रेण वेष्टयित्वा ईशानादिकोणोपकण्ठे यवान् प्रस्तीर्य तदुपर्यासनषट्कं समभ्यर्च्य तदुपरि पयःसंयुतोदकपूर्णं पञ्चरत्नसर्वौषधिपूगफलादिफलगर्भं

Page 127

कुङ्कुमादिविच्छित्तिरञ्जितं चूतपल्लवच्छन्नं सोपवीतं समाल्यं तण्डुलफलसम्पूर्णपात्रमुखं सवस्त्रयुग्माच्छादितं देवीकुम्भं व्यवस्थाप्य तदुपरि देवीमावाह्य मूलमन्त्रेण तां सम्पूज्य वारिधानीमलङ्कृत्यास्त्रेणाभ्यर्च्य पूर्वादीशानान्तेषु मुख्यकुम्भवदलङ्कृतेषु कुम्भेष्वष्टसु अष्टौ वशिन्यादिका(ः)सैकारै(ः)स्वस्वनामपदैर्नमोन्तैर्यज्ञरक्षार्थं पूजयेत् । ततः प्राग्वन्मण्डले नित्यनैमित्तकार्यं पूजां कृत्वाऽधिवासनपवित्रं देव्या आरोपयेत् । यथा पवित्रं गन्धपुष्पसहितं धूपवासितमादाय ध्यात्वा देवीं पवित्रस्य समग्रस्याधिकारिणीं मूलविद्यां समुच्चार्य सर्वचक्रान्तरालस्थे सर्वपीठाधिपे सर्वतत्त्वात्मिके परब्रह्माभिन्नरूपे महात्रिपुरसुन्दरि कृतसंवत्सरनित्यनैमित्तकपूजापरिपूरणाय सर्वकामावाप्तये च एह्येहि द्वारपालगुरुसिद्धदेवताचक्रेश्वरीपरिवारिता पवित्रारोहणावाहनसमये आमन्त्रणगन्धपवित्रकमिदं तुभ्यं नम इति गन्धपवित्रं देवीशिरस्यर्पयेत् ।
ततः परेद्युः कुम्भपूजां नित्यनैमित्तिकीं च देवीपूजां कृत्वा देवीकुम्भे तावन्मूलेन तत्समाप्तौ तुभ्यमिदं पवित्रं नम इत्यनेन पवित्रकमारोप्यास्त्रेण

Page 128

वारिधान्यां तथैवारोप्य वशिन्यादिदिग्देवतानां स्वस्वनामभिरौकारादिनमोन्तैस्तुभ्यमिदं पवित्रं नम इत्युच्चार्यार्पयेत् । ततः प्रधानदेवीमन्त्रमुच्चार्यात्मानं देवीरूपं ध्यात्वाऽत्मनि पवित्रकं समारोपयेत् । ततः परिवारदेवीनां स्वस्वनाममन्त्रैस्तुभ्यमिदं पवित्रकं नम इत्येव मन्त्रैः प्रतिचक्रं पवित्रकं समर्प्य मूलमन्त्रमुच्चार्य सोमसूर्यवह्निचक्रेश्वरि त्रैलोक्यमोहनादिसर्वचक्राधिष्ठातृ ब्रह्मविष्णुरुद्रपरब्रह्मात्मिके आत्मतत्त्वविद्यातत्त्वशिवतत्त्वव्यापिके निजरूपाभिन्नेच्छाज्ञानक्रियाशक्तिस्वरू समस्त(मन्त्र)मातर्महात्रिपुरसुन्दरि परचिच्चमत्कारधर्मिण्यणिमादिनिखिलसिद्धिप्रदे सांवत्सरिकनित्यनैमित्तिकपूजापरिपूरणाय तुभ्यमिदं सुपवित्रकं नम इति (चक्र)देव्यै दत्त्वा पवित्रत्रयं ततः समयविद्यां स्मृत्वा तेनैव वाक्येन गङ्गावतारे तुभ्यमिदं पवित्रकं नम इति समर्पयेत् ।

अथ -

प्रसीद मम देवेशि क्रियालोपो यतो गतः ।
मध्ये संवत्सरस्यास्य आदावन्ते तथा भवेत् ॥

Page 129

तदनेनानुयोगेन सितसूत्रान्वितेन तु ।
ममास्तु तत् सुसम्पूर्णमखण्डं त्रिपुरेश्वरि ॥

इति पीठत्वोपतिष्ठेत् । ततोऽग्निकार्यं निर्वर्त्याग्नौ देवीं ध्यात्वा पूर्ववत् पवित्रकमर्पयित्वा महानैवेद्यादिधूप(दीप)घण्टावादित्रारार्तिकगीतनृत्यकुमारीबटुकयोगिनीतर्पणादिप्रदक्षिणं कृत्वा कृतकृत्यः स्वपेत् ।

ततोऽपरेद्युर्नित्यनैमित्तिकपूजां कृत्वा होमं विधाय कुमारीबटुकयोगिनीचक्रमभ्यर्च्य देव्यै दक्षिणां नैवेद्यं पूर्णाहुतिं कृत्वा वह्निस्थां देवीं विसर्ज्य एतत्ते निर्माल्यनैवेद्यपवित्रादिकं श्रीत्रिपुरसुन्दरि शेषिकाभ्यो नम इति समर्प्य तत्सर्वं वस्त्रे बद्ध्वाऽगाधजलेषु विनिक्षिपेत् ।

अथान्तरं पवित्रं योगिनां लिख्यते । कुलशक्तिमध्युष्टवलयां मृणालतन्तुनिभां तडित्कोटिविडम्बिनीं विश्वसूचनात् सूत्रभूतामुत्थाप्य नवचक्र(वि)भ्रमचतुरां चक्रप्रतिलोमेन ब्रह्मरन्ध्रं नीत्वा शृङ्गाटोदरगतायामनवगर्भस्थितायां

Page 130

परशक्त्यामर्पयेत् त्रिवारम्, तेन मानसकर्मलक्षणं वत्सरजं प्राप्यते । तदुक्तमनन्तशक्तिभट्टारकैः (त्रिपुरसुन्दरीकल्पलतायाम्)-

यत्प्रोतं विश्वमेतद्भुवनविरचनात् तत्त्ववर्णाद्यमुद्यन्मन्त्रस्फारानुषक्तं प्रततपदकलाद्वैतरूपं विभाति ।
तद्दीपं शक्तिसूत्रं परमशिवमहापूगदेदीप्यमानं वन्दे पूजाक्रमस्य प्रचुरफलविधौ हेतुभूतं स्वहृत्स्थम् ॥

॥ इति श्रीविद्यानन्दनाथविरचितायां त्रिपुरसुन्दरीपद्धत्यां ज्ञानदीपविमर्शिन्यां पवित्रपद्धतिरेकोनविंशतिः ॥

Page 131

## दमनपद्धतिः

अथ दमनकारोपणं द्विविधं बाह्याभ्यन्तरभेदेन ।
हेलावलोकनबलाद्विलयं विधाय
कामं चकार तरसाभिनवं स शम्भुः ।
यद्दीप्तवीर्यविभवाश्रयणेन शक्तिः
साव्यात् त्रिलोकजननी त्रिपुरा जगन्ति ॥

देव्याः करोति परशक्तिमहोदयेन
दिव्यं वसन्तसमये दमनोत्सवं यः ।
कामान् नितान्तमिह कामिजनः समन्ताद्
आप्नोति शश्वदमितान् स्वहृदन्तरस्थान् ॥

दमनकस्य विधिं वक्ष्ये शास्त्रदृष्टेन कर्मणा ।
येन सांवत्सरी पूजा साफल्यं भजते नृणाम् ॥

पूर्वं समाधिसंस्थस्य शिवस्यामिततेजसः ।
तपोनिकृत्तये कामः शक्रेण प्रेषितो यदा ॥

Page 132

तदा ललाटनेत्राग्निज्वालाभिस्तेन शम्भुना ।
भस्मराशीकृतः कोपात् स कामस्तत्र विश्वजित् ॥

रतिः पतिवियोगार्ता प्रीतिः शोकाद् रुरोद च ।
तदश्रुपातादुद्भूता दमनस्य लता शुभा ॥

तद् रामणीयं सौरभ्यं पवित्रत्वं च शङ्करः ।
दृष्ट्वादाय मुद्रा दध्रे मूर्ध्नि तामतिकौतुकात् ॥

रतिप्रीतिशुचं ज्ञात्वा करुणाविष्टमानसः ।
अनङ्गं निर्ममे शम्भुर्भूयः सङ्कल्पमात्रतः ॥

ततो वरं ददौ तस्मै कन्दर्पाय स शक्तिमान् ।
वसन्ते दामनीं पूजामस्माकं न करोति यः ॥

वत्सरार्चाफलं तस्य तव सर्वं भविष्यति ।
इत्यस्मात्कारणात् सन्तः कुर्वन्ति दमनोत्सवम् ॥

तत्र पवित्रमृदापूर्णे खर्परे समूलं दमनकमादाय नवधा कृत्वा हसक्षमलवरयूं इति मन्त्रेणामन्त्र्यास्यैवैकैकाक्षरेण सनादबिन्दुना नवधा मन्त्रितं पृथक् पृथगारोप्य अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः सर्वेभ्यः शर्व सर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यो नम इत्यघोरमन्त्रेणाभिषिच्यास्त्रेण वामकरतर्जन्याग्रविलेखनेन

Page 133

रक्षां कृत्वा कवचेन मूलमुद्रयोपरि करभ्रामणेनावगुण्ठ्य स्थापयेत् । ततो वृद्धिगतश्चैत्रमासि सितत्रयोदश्यां तं दमनकमस्त्रेणोद्धृत्य कुङ्कुमादिसुगन्धद्रव्यैर्हृदयमन्त्रेणालभ्य पवित्रवदधिवास्य प्रातश्चतुर्दश्यां नित्यपूजां निर्वर्त्य पवित्रवद् घटस्थापनादिकं कृत्वा ततः कुङ्कुमधूपादिवासितेन तेनैव (दमनेन)नित्यनैमित्तकपूजां कृत्वा दमनकं समर्प्य देव्यै पूजामण्डले कुङ्कुमोदकादिना (मण्डलान्तरं)विरच्य हस्तेनाशोकतरुमालिख्य तदुपरि त्रिकोणं कृत्वा तन्मध्ये नवयौवनमारक्तवस्त्रालङ्कारभूषितं रतिप्रीतिभ्यां कामदेवं सर्वोपचारसहितेन मद(दम)नकेनाभ्यर्च्य ऐं ह्रीं श्रीं फ्रें रत्यै नमः, ऐं ह्रीं श्रीं फ्रें प्रीत्यै नम इति मन्त्रेण रतिप्रीती समभ्यर्च्य वं वसन्ताय नम इति (मन्त्रेण)वसन्तमर्चयित्वा ऐं कं कदम्बवनाय नम इत्युद्यानं सम्पूजयेत् ।
तेषां ध्यानं यथा - वसन्तो गौरवर्णो वामकरार्पितामृतपूर्णकलशः, दक्षिणकरे नानापुष्परचितमालाधारी, रतिप्रीती द्वे गौरश्यामवर्णे ताम्बूलपत्रमुदितवामकरे कुशेशयनीलोत्पलहस्ते दिव्यवस्त्रावृते

Page 134

दिव्याभरणभूषिते पुष्पमालोपशोभिते ध्येये । इति काममर्चयित्वा आगमोक्तं तत्प्रसादनाय वाक्यं पठेत् । यथा -
देव्यभ्यर्हितेन देवेन वरस्ते मन्मथार्पितः ।
यस्तेन पूजा निर्विघ्नं भूयान्मे त्वत्प्रसादतः ॥

इति मदनोत्सवपूजां निर्वर्त्याग्निकार्यं कृत्वा दमनकपूजासमर्पणं विधाय ततो दमनकसम्पूजितामिष्टदेवतामा
ततो गुरुं ततः स्वात्मानं दिव्यसूक्ष्मघण्टिकाद्यलण्कृतहिन्दोलकाधिरूढं कृत्वा गीतवाद्यनृत्यादि (विविधोत्सवं)विधायाभीष्टदेवतामुद्दिश्य कुमारीचक्रं सन्तर्प्य स्वविभवानुसारेण स्वगुरुं सपरिवारं यथाशक्त्या हेमवस्त्रादिना सम्पूज्य तत्प्रसादादाज्ञां गृहीत्वा दीपोत्सवं कुर्यात् । यथा -
गोधूमाश्च सिताशालीगुडखण्डविमिश्रिताः ।
शर्करादिकसंयुक्ता लवणेन्दुविमिश्रिताः ॥

क्षीरेणालोडयेत् तत्तु स्वयम्भुकुसुमान्वितम् ।
कुण्डगोलकसम्मिश्रं नवद्रव्यविमिश्रितम् ॥

सार्धत्र्यङ्गुलमानां त्रिकोणाकारां चक्रेश्वरीं नवकसङ्ख्यया कृत्वा घृतेन पक्तान् रक्तवर्त्तिकान् गोघृतपूरितान् स्थाल्यभ्यन्तरे चाष्टदिक्षु मध्ये संस्थाप्य

Page 135

सिद्धद्रव्यं यवदधिमधुघृतलोलीभूतचरुं मद्यदीपासनत्वेन संस्थाप्य चणकादीन् विकीर्य परितस्ताम्बूलपत्रान् सपूगफलान् निक्षिप्य रत्नस्वर्णसमेतान् कृत्वा ऐङ्काराङ्कितत्रिकोणवृत्तचतुरस्रमण्डलं कृत्वा देवीं षडङ्गेनाभ्यर्च्य दीपासनस्थालीश्च तस्मिन् प्रतिष्ठाप्य क्लीङ्कारेण प्रबोध्य नवनित्याभिः प्रत्येकं हेतुपुष्पगन्धराराध्य भूजानुको भूत्वा कराभ्यामुद्धृत्य मूलविद्यासमयविद्याचतुष्टयप्रान्ते प्रागारार्त्तिकपरिभ्रामणोक्तं वाक्यद्वयं पठन् देवीपुरतः प्रादक्षिण्येनाध्युष्टवारं परिभ्राम्य तन्मण्डले प्रतिष्ठाप्य स्वस्वसामयिकैः सह रहसि तान् दीपान् सचतुष्कान् सशालिकान् सम्प्राश्याचम्य मूलदेवीं नमस्कृत्य पूर्णाहुतिं (दत्त्वा)वह्निस्थां मण्डलस्थां देवीं विसृज्य निर्माल्यानि वेद्यारोपितं मद(दम)नकं शेषिकाचेटिकाभ्यो निवेद्य ताश्च विसृज्य मूलविद्यामङ्गसहितां प्राग्वद् देहे विन्यसेत् ।

अथाभ्यन्तरदमनकं (यथा)- भ्रूमध्ये मूलविद्यामुदितकोटिबालार्काभां दमनकाख्यां दमनोद्भवां (ध्यात्वा)मनसा सम्पाद्य तामाभ्यन्तरचक्रेश्वर्यै अनच्ककलासंसृ(श्रि)तायै मूलेन समर्प्याभ्यन्तरद्वारस्थेभ्यः कामरतिप्रीतिवसन्तोद्यानेभ्यो दत्त्वा मानसकर्मसिद्ध्यै प्रार्थनावाक्यं पठेत्, दीपोत्सवं चाभ्यन्तरं

Page 136

कुर्यात् । यथा - अकुलशृङ्गाटे निश्शेषजगद्बीजमाद्यवर्णं प्रकाशं शिवरूपं दीपं समर्पयेत् । चरुकमपि तद्विमर्शरूपमधःशृङ्गाटोदरगतं परामृतकलया सिक्तं भावयेत् ।
निमित्तार्चनतिथयस्त्वेना मन्तव्याः - शिवरात्रिदिनत्रयं दीपोत्सवदिनत्रयं दक्षिणोत्तरायण(दिनद्वयं)चन्द्रसूर्यौ युगाद्यादिदिनमात्मजन्मत्रयं गुरुजन्मत्रयं स्वदीक्षादिनमित्यादि ।
॥ इति श्रीविद्यानन्दनाथविरचितायां श्रीत्रिपुरसुन्दरीपद्धत्यां दमनकपद्धतिर्विंशतिः ॥

Page 137

## काम्यपद्धतिः

अथ काम्यप्रयोगांश्च कथयामि समासतः ।
यैः प्राप्नुवन्ति मनुजाः प्रार्थितानप्रयत्नतः ॥

सारस्वतार्थी मूलवाग्भवमाणवोपायेन शाक्तोपायेन वा साधयेत् । अ(आ)णवः क्रियानुध्यानजः । यथा - श्वेतवस्त्रगन्धालङ्कारादिसहितः श्वेतापवरकमध्यगः श्वेतवस्त्रालङ्कारां पुस्तकाक्षमालाम्बरां चतुरस्रसहितमध्यचक्रगां ध्यात्वा श्वेतैरेव गन्धाद्युपचारैर्मूलाद्येन सिद्धिमातृकामुद्रावशिन्यादिसहितां कोणदेवीरहितामभ्यर्च्य तत्पुरतः श्वेताक्षमालया नवलक्षं जपेत् । तदन्ते योनिकुण्डे मल्लिकाजात्यादिश्वेतपुष्पैराज्यमधुप्लुतैर्दशांशं जुहुयात्, तर्पयेत् शतांशेन । मस्तके हृदये श्वेतवर्णां ध्यात्वाऽत्मानमपि देवीरूपं ध्यात्वा जपेत् । अथवा पूजाविरहितं हितकृतन्यासः श्वेतवर्णां भगवतीं मूर्ध्नि हृद(द्)ध्यानपूर्वकमात्मानं (च)तन्मयं ध्यात्वा मूलाद्यरूपां कुण्डलिनीं मूलादिब्रह्मरन्ध्रगां शरच्चन्द्रकरोपमां करामृतलोलीभूतां समस्तवेदशास्त्रागमानुद्गिरन्तीं चक्रे विलीनां ध्यायेत् । अयं शाक्तोपायः । तथा (व्य?)वश्याद्यर्थी रक्तवस्त्रगन्धानुलेपनादिकृतन्यासः कामकलारूपमात्मानं ध्यात्वा तदनु चतुरस्रचतुर्दशारदशारद्वयाष्टकोणमित्रकोणचक्रगां कामकलारूपां चतुर्भुजां पाशाङ्कुशचापबाणधरां ध्यात्वा

Page 138

सिद्धिमातृमुद्राचतुर्दशद्वयवसुदेवीसहितां कोणदेवीरहितां मूलमध्येन सम्पूज्य रक्ताक्षमालया नवलक्षजपं विधाय ततो रक्ताश्वेअमारजपापुष्पाद्यैर्मधुरत्रितययुतैस्त्रिकोणकुण्डे दशांशं जुहुयात् । शतांशेन तर्पयेत् । एवं कृत्वाऽचिरादपरः कामो भवति । अथवा तादृग्रूपां भगवतीमात्मानं ध्यात्वा मूलमध्यरूपां कुलकुण्डलिनीमूलाद् ब्रह्मरन्ध्राद् मूलान्तं द्राव्यद्रावकभावेन ध्यायेत् । तथा विषापहारार्थी श्वेतवस्त्रालङ्कारादिश्वेतवर्णां पाशाङ्कुशपुस्तकाक्षमालाधरां समस्तचक्रमध्यगां ध्यात्वा कोणदेवीरहितसमस्तपरिवारदेवतासहितां मूलतार्तीयेन सम्पूज्य श्वेताक्षमालया नवलक्षं जपं विधाय श्वेतपुस्पैराज्यमधुप्लुतैश्चतुरस्रकुण्डे दशांशं जुहुयात् । शतांशेन तर्पयेत् । एवङ्कारी कामकलावञ्चनकरी(रो)भवतीति ।

तादृग्रूपां देवीमात्मानं सञ्चिन्त्य मूलतार्तीयरूपां कुण्डलिनीं मूलान्तं (लम्बि)बिकान्तं लम्बिकातो ब्रह्मरन्ध्रं(न्ध्रान्तं ब्रह्मरन्ध्रात् पुनर्लम्बिकापर्यन्तं शरच्चन्द्रकरोपमां ध्यायेत् । तस्याप्यचिरात् पूर्ववत् फलसिद्धिः । अथवा रक्तवस्त्राद्यं त्रिपुरसुन्दरीविग्रहमात्मानं ध्यात्वा समस्तचक्रमध्यस्थां समस्तपरिवारसहितां समष्टिविद्यया चाभ्यर्च्य तत्पुरस्ताद् रक्ताक्षमात्रया नवलक्षजपं कृत्वा चतुरस्रादिकुण्डे पलाशपुष्पैर्मधुरत्रयान्वितैर्दशांशं हुत्वा शतांशं सन्तर्प्य

Page 139

पश्चिमाभिमुखलिङ्गपुरतो लक्षमेकं जपेत् । इत्थङ्कारी साक्षाद् भैरवो भवति । अथवा महात्रिपुरसुन्दरीमात्मानं ध्यात्वा समस्तविद्यारूपां कुलकुण्डलिनीं जन्मस्थानाद् हृदयं हृदयाद् भ्रूमध्यं भ्रूमध्याद् ब्रह्मरन्ध्रं पुनश्च ब्रह्मरन्ध्राद् भ्रुमध्यमित्येवङ्क्रमेण । द्राव्यद्रावकभावेन केवलपद्मरागनिभां ध्यायेत्, यावन्मनोलयः । तस्यापि पूर्ववत् तत्फलसिद्धिः ।

मननत्राणधर्मोऽसौ मन्त्रो यः परिकीर्तितः ।
तस्याधारो मन्त्रपीठः पूर्णाख्यो जयतादजः ॥

इत्याद्यस्य ज्येष्ठस्याधिकारः ।
त्र्यस्रदक्षिणकोणस्था वज्रेशी जालपीठगा ।
नवविद्याख्यसङ्केतस्फारसिद्धिप्रदायिका ॥

करशुद्धौ देहरक्षाङ्गासने च रथाङ्गके ।
मन्त्राधारे तथा साध्यावाहने तु सुपूजितः ॥

त्रिपुरा त्रिपुरेशी च सुन्दरी पुरवासिनी ।
श्रीर्मालिनी च सिद्धाम्बा महात्रिपुरभैरवी ॥

विद्यासङ्केतमेतत्तु गुरुपङ्क्तित्वमागतम् ।
श्रीमद्दीपकसन्तानसन्तत्या दर्शितं नुमः ॥

गुदमेढ्रनाभिचक्रहृद्दलभ्रूविभेदितम् ।
तरुणारुणसङ्काशं कामराजं समुच्चरेत् ॥

इति षष्ठनाथ(स्य)मध्यमस्याधिकारः ।
त्र्यस्राग्रकोणगा या सा कामेशी कामपीठगा ।
मुद्रादशकसङ्केतदशसिद्धिप्रदायिका ॥

Page 165
एका चैव महामुद्रा योनिमुद्रात्वमागता ।
तया विभक्तमात्मानं सङ्क्षोभादिप्रभेदतः ॥

शक्तिगर्भात्प्रोच्चलन्तं हृद्ग्रन्थिप्रविभेदकम् ।
देदीप्यमानं जिह्वाग्रे वाग्भवं तु समुच्चरेत् ॥

कामपीठे स्थिता चाज्ञा कामतत्त्वविबोधिका ।
स्मरणाद्देशिकेन्द्राणां वाग्विलासप्रदायिका ॥

द्रावणात् पाशजालस्य तत्परस्य तु मोदनात् ।
मुद्रापीठमिति प्रोक्तं कामरूपं नमाम्यहम् ॥

एतद्बालमित्रस्याधिकारः । त्रिसिद्धा ओलित्रयाभिमानिन इति । तदुक्तं सङ्केतपद्धत्यां -
कन्दाग्रकोणात्प्रोच्चैर्या स्फुरन्ती सततोदिता ।
कामेशी सर्वगां नित्यां गुरुरूपां नमामि ताम् ॥

सूक्ष्मेण मस्तकाक्रान्तं बिन्दुनोपरि भूषितम् ॥

पाग्रं झिण्टीशसंयुक्तं केवलं यथमध्यगम् ।
नैर्ऋत्यकोणगं गृह्य तमेव पुनरुद्धरेत् ॥

चथमध्यासनस्थं तु कृत्वा भूयः समुद्धरेत् ।
झिण्टीशेन समायुक्तं धवमध्यं समुद्धरेत् ॥

फकमध्यं समादाय शाग्रानन्तविभूषितम् ।
लकुलीशमनन्तान्तमन्तिमं परिकीर्तितम् ॥

नित्यक्लिन्नेयमुदिता तृतीया तिथिनायिका ।
सद्योजातं समुद्धृत्य बिन्दुना मूर्ध्नि भूषितम् ।
अःखमध्यगतं गृह्य लाग्रासनसमन्वितम् ॥

ॐकारमस्तकाक्रान्तं द्वितीयं परिकीर्तितम् ।
जडमध्यं समादाय लयमध्यासनान्वितम् ॥

सद्योजातसमाक्रान्तं बिन्दुना मूर्ध्नि भूषितम् ।
ऋसमध्यं समादाय चथमध्यासनस्थितम् ॥

Page 188
बिन्द्वनुग्रहसंयुक्तं चतुर्थं परिकीर्तितम् ।
आग्नेयकोष्ठकं गृह्य ङतमध्यासनस्थितम् ॥

बिन्द्वनुग्रहसंयुक्तं पञ्चमं परिकीर्तितम् ।
चजमध्यं समादाय लाग्रासनसमन्वितम् ॥

भुवनक्रूरसंयुक्तं पञ्चकं परिकीर्तितम् ।
छहमध्यं समादाय भुजङ्गासनसंस्थितम् ॥

सद्योजाताग्रसंयुक्तं बिन्दुना मूर्ध्नि भूषितम् ।
षष्ठमं कथितं बीजं तदन्ते वह्निवल्लभा ॥

भेरुण्डा कथिता नित्या चतुर्थी चाष्टवर्णका ।
सद्योजातं समुद्धृत्य अक्रूरेण समन्वितम् ॥

मध्यकोष्ठकमादाय लाग्रासनसमन्वितम् ।
चतुर्थस्वरसंयुक्तं बिन्दुनादविभूषितम् ॥

बीजमेतत् समुद्धृत्य केवलं साग्रमुद्धरेत् ।

क्रूरामरेशसंयुक्तं मध्यकोष्ठगतं लिखेत् ॥

सोमेश्वरार्धसंयुक्तं शिखीशं वीप्सयेत्तदा ।
हाग्रं खड्गीशसंयुक्तमनन्तेन विभूषयेत् ॥

श्रीकण्ठाग्रसमायुक्तं लकुलीशं समुद्धरेत् ।
ज्वालामालिनी नित्येयमुद्धृता च चतुर्दशी ॥

पञ्चादशाक्षरी विद्या सर्वकामफलप्रदा ।
बडमध्ये केवलं तु प्रथमं वर्णमुद्धरेत् ॥

क्रूरानुग्रहसंयुक्तं क्रोधीशं तदनन्तरम् ।
एकाक्षरसमाख्याता चित्रा पञ्चदशी स्मृता ॥

कामेश्वरी च वज्रेशी नित्या च भगमालिनी ।
सुन्दरी त्रिपुरा पूर्वाश्चतस्त्रः समयात्मिकाः ॥

Page 198

कामेशीभगमालिन्यौ नित्यादेहगते उभे ।
वज्रेशीसुन्दरीनित्ये उद्धृते नेत्रगह्वरे ॥

सद्यः पूर्वं समादाय अक्रूरेण विभेदयेत् ।
प्रथमं बीजमाख्यातं सर्वाभीष्टफलप्रदम् ॥

मध्यकोष्ठगतं गृह्य भुजङ्गासनसंस्थितम् ।
त्रिमूर्तिबिन्दुसंयुक्तं द्वितीयं परिकीर्तितम् ॥

मध्यमाग्रं केवलं स्यात् तृतीयो वर्णनायकः ।
साग्रं भुजङ्गानन्तं समध्यगामनन्तरम् ॥

भुजङ्गं बालिसंयुक्तं भौतीशोत्तरसंयुतम् ।
षष्ठं वर्णं समाख्यातं सप्तमं कल्प्यतेऽधुना ॥

वालीशपृष्ठमादाय तदमध्येन योजयेत् ।
साग्रः केवल एव स्याद्वर्णराजस्ततः परम् ॥

त्र्युत्तरं सूक्ष्मसंयुक्तं तदन्ते वर्णमुद्धरेत् ।
साग्रं केवलमुद्धृत्य हपृष्ठं रेफसंयुतम् ॥

झिण्टीशसंयुतं कृत्वा शार्णशाग्रेण संयुतम् ।
अनन्ताग्रयुतं लाग्रं उद्धृत्य पुनरुद्धरेत् ॥

भृग्वीशथाग्रसंयुक्तो भुजङ्गीशसमन्वितः ॥

त्रिमूर्तिक्रूरसंयुक्तस्त्रयोदशम ईरितः ।
हाग्रः केवल एव स्यात् शाग्रो द्विलाग्रसंयुतः ॥

षष्ठस्थः केवलोऽन्तेऽस्य णपृष्ठः खङ्गसंयुतः ।
महासेनसमायुक्तो भुजङ्गीशस्तदन्ततः ॥

माग्रो भूतीशसंयुक्तो यपृष्ठः स्यादनन्तरम् ।
खङ्गीशसूक्ष्मसंयुक्तो भौतीशाक्रूरसंयुतः ॥

आद्यं बीजमथान्तेऽस्या द्वात्रिंशार्णा समुद्धृता ।
समयेशी चतुर्थी या विद्या त्रिपुरसुन्दरी ॥

मुद्राबीजानि
अथेन्दानीं स्वमुद्राणां बीजानि कथयाम्यहम् ।
रचितेयं त्रिखण्डाख्या सर्वसिद्धिफलाप्तये ॥

Page 201
पिनाकी दक्षमादाय वालिपुच्छेन योजयेत् ।
अनुग्रहोत्तरोपेतमक्रूरेण समन्वितम् ॥

सर्वसङ्क्षोभिणीमुद्राबीजं त्रैलोक्यमोहनम् ।
सूक्ष्मा गृहीतं तद्बीजमनन्तेन समन्वितम् ॥

सर्वविद्राविणीमुद्राबीजमेतत्प्रकाशितम् ।
दारुणोत्तरमादाय अत्रिवामासनस्थितम् ॥

अर्घीशाक्रूरसंयुक्तं बीजमाकर्षणं मतम् ।
भृग्वीशवाममादाय ङदमध्यासनस्थितम् ॥

सूक्ष्मेशाग्रसमायुक्तं सेनपुच्छविभूषितम् ।
सर्वावेशकरीमुद्राबीजमेतत् समुद्धृतम् ॥

शिखीशवाममादाय महासेनेन योजयेत् ।
सर्वोन्मादकरीमुद्राबीजमुन्मादनं परम् ॥

वज्रपुच्छं समादाय कूर्मदक्षासनस्थितम् ।
बिन्दुमस्तकसंयुक्तं सद्योजातेन भूषितम् ॥

एतन्महाङ्कुशामुद्राबीजं साक्षात् समुद्धृतम् ।

भृग्वीशपुच्छमादाय श्वेतपुच्छासनस्थितम् ॥

क्रोधीशाग्रसमायुक्तं भृगुदक्षिणयोजितम् ।
वालिपुच्छासनारूढं झिण्टीशाक्रूरभूषितम् ॥

Page 202
सर्वसङ्क्षोभिणीमुद्राबीजमाज्ञाकरं परम् ।
भृग्वीशपुच्छमादाय तदग्रासनसंस्थितम् ॥

अनुग्रहेशसंयुक्तं  बिन्दुनोपरि भूषितम् ।
बीजं तद्बीजमुद्राया जगद्बीजफलाप्तिदम् ॥

कूर्मवासं समादाय सेनपृष्ठसमन्वितम् ।
बीजं तद्योनिमुद्राया जगद्योनिफलाप्तिदम् ॥

एवं बीजानि मुद्राणां यथायोगं नियोजयेत् ।
चतुराम्नायविद्योद्धारः
चतुराम्नायविद्यानामुद्धारोऽथ प्रदर्श्यते ॥

श्वेतपृष्ठं समादाय भृगुपृष्ठेन योजयेत् ।
थकारवामसंयुक्तं मूर्तिबिन्दुसमन्वितम् ॥

विद्येयं रुद्रशक्त्याख्या सर्वाम्नायाधिनायिका ।
अनन्तदक्षमादाय अत्रीशोत्तरसंस्थितम् ॥

सद्योजातोत्तराक्रान्तं बिन्दुना मस्तकेऽङ्कितम् ।
ञकारोत्तरमादाय झिण्टीशेन समन्वितम् ॥

तृतीयवर्णमाख्यातं चतुर्थमपि कथ्यते ।
झषमध्यं समादाय ङदमध्यासनस्थितम् ॥

सूक्ष्माग्रं मस्तकाक्रान्तं बिन्दुनोपरि भूषितम् ।
बीजमेतत्समाख्यातं त्रैलोक्याकृष्टिदायकम् ॥

केवलं याग्रमुद्धृत्य दण्डिपृष्ठं समुद्धरेत् ।
लकारं दक्षिणं गृह्य वालिपृष्ठेन योजयेत् ॥

शाग्रं झिण्टीशसंयुक्तं तदन्ते परिकीर्तितम् ।
महासेनाग्रमादाय त्रिमूर्त्यग्रेण योजयेत् ॥

डकारदक्षिणं गृह्य झिण्टीशेन नियोजयेत् ।

एतदन्ते मध्यकोष्ठं तदन्तासनसंस्थितम् ॥

सद्योजाताग्रसंयुक्तं बिन्दुनोपरि भूषितम् ।
एकादशाक्षरा सेयं विद्या दक्षिणनायिका ॥

लकुलीशं तदग्रं च तदधो लाग्रमेव च ।
संलिख्य मस्तके तस्य भौतीशं बिन्दुसंयुतम् ॥

दत्त्वा समुद्धृतं कूटं प्रथमं प्रणवं भवेत् ।
जग्राधो हाग्रमुद्धृत्य तदधो भृगुपृष्ठगम् ॥

तस्याधो वालिपुच्छं च लिखित्वा तस्य मस्तके ।
त्रिमूर्तिबिन्दुसंयुक्तं द्वितीयं प्रणवं भवेत् ॥

मध्यकोष्ठकमुद्धृत्य तदधः श्वेतपुच्छकम् ।
तदधो याग्रमुद्धृत्य दण्डिवामं ततोऽप्यधः ॥

त्रिमूर्तिबिन्दुसंयुक्तं शिरस्तस्य प्रकल्पयेत् ।
तृतीयं प्रणवं ख्यातं कमलाप्तिफलप्रदम् ॥

Page 204

कममध्यं समुद्धृत्य कफमध्यं समुद्धरेत् ।
तस्याधश्चण्डमुद्धृत्य शिखीशानं ततोऽप्यधः ॥

लाग्रं तस्यासने दद्याद् झिण्टीशं शिरसि न्यसेत् ।
अक्रूरेण समाक्रान्तं चतुर्थं प्रणवं व्रजेत् ॥

अफमध्यं समादाय क्रोधदक्षे निवेशयेत् ।
खड्गीशं तदधो न्यस्य मस्तकेऽनुग्रहेश्वरम् ॥

अक्रूरेण समाक्रान्तं पञ्चमं प्रणवं भवेत् ।
द्विरण्डं केवलं ग्राह्यं तदन्ते खाग्रगं तथा ॥

खड्गीशं केवलं भूयस्तदन्ते वालिदक्षिणम् ।
कुर्यात् सूक्ष्मेशसंयुक्तं तदन्तेऽन्यत् समुद्धरेत् ॥

(मरुत्कोष्ठगतं गृह्य अक्रूरेण तु योजयेत् ।
झिण्टीशेन समायुक्तं भकाराग्रं समुद्धरेत् ॥)
तदन्ते तु नवात्मानं नवात्मान्ते नवात्मिकाम् ।
अक्रूरेश्वरसंयुक्तं भृगुवामं समुद्धरेत् ॥

हृदये मनुकोणस्थाः शक्तयोऽपि च पूर्ववत् ॥

नाभौ त्वष्टदलं तत्तु वंशे वामे च पार्श्वके ।
उदरे सव्यपार्श्वे च न्यसेदादिचतुष्टयम् ॥

स्वाधिष्ठाने न्यसेत् तस्य पूर्वाद्दक्षावसानकम् ॥

(सकामाकर्षणीर्नित्याकलाषोडकशं पुनः ।)
मूलाधारे न्यसेन्मुद्रादशकं साधकोत्तमः ॥

Page 239
पुनः सव्ये च वंशे च वामे चैवान्तरालके ।
ऊर्ध्वाधो दशमुद्राश्च ऊर्ध्वाधोवर्जितं पुनः ॥

ब्रह्माण्याद्यष्टकं दक्षजङ्घायां तास्तु पूर्ववत् ।
वामजङ्घां समारभ्य वामादिक्रमतोऽपि च ॥

सिद्ध्यष्टकं न्यसेच्छेषं द्वयं पादतले न्यसेत् ।
कारणात् प्रसृतं न्यासं दीपाद्दीपमिवोद्धृतम् ॥

एवं विन्यस्य देवेशीं स्वात्माभेदेन चिन्तयेत् । (यो. हृ. ३.६८-८१)
(पूजयेत् परमेशानं कामेश्वरमनीश्वरम् ॥

स्वच्छन्दाख्येन मन्त्रेण पञ्चब्रह्मषडङ्गयुक् ।
वामादिशक्तिभ्हिः सार्धं श्रीगुरुं च शिरस्यपि ॥

मातृकान्तरिताचूलं व्यस्तव्यापकमाचरेत् ।)
मूर्ध्नि गुह्ये च हृदये नेत्रत्रितय एव च ।
श्रोत्रयोर्युगले देवि मुखे च भुजयोः पुनः ॥

पृष्ठे जान्वोश्च नाभौ च विद्यान्यासं विधाय च । (यो. हृ. ३.८२-८३)
(श्रोत्रयोश्चिबुके चैव शङ्खास्येषु दृशोर्नसि ॥

अंसद्वये च हृदये न्यसेत् कूर्परकुक्षिषु ।
जान्वंसपादगुह्येषु पार्श्वहृत्सु स्तनद्वये ॥

सकण्ठे नवयोन्याख्यो न्यासो बीजत्रयात्मकः ।)

Page 240
करशुद्धिं पुनश्चैव आसनानि षडङ्गकम् ॥

तत्र प्रकटयोगिन्यश्चक्रे त्रैलोक्यमोहने ॥

इति

The text is reproduced here with the permission from
Tripurā Tallikā Research and Publishing Group
www.tripuratallika.org

Copyright 2024 Tripurā Tallikā. All Rights Reserved.
E-texts may be viewed online or downloaded for private study. E-texts may not, under any circumstances, be copied, republished, reproduced, distributed or sold, either in original or altered form, without the express permission of Tripurā Tallikā in writing.

Disclaimer: Etexts are prepared by the Tripurā Tallikā team as a service to scholars, practitioners, and the international Śrīvidyā community and may contain typos, errors, and other mistakes. Every effort has been made to present the most accurate transcriptions possible, without emendation (diplomatic transcription), from the source materials into the International Alphabet of Sanskrit Transliteration (IAST).

Author: Vidyānanda

Title: Jñānadīpavimarśinī

Source: Dwivedi, Vrajavallabha (ed). Jñānadīpavimarśinī. Yogatantra Granthamālā No.26, Sampuranand Sanskrit University, Varanasi. 1996.

Description: The Jñānadīpavimarśinī by Vidyānanda, also known as Śrīvidyānandanātha and Vidyānandanātha (fl. c. 13th century), is a ritual manual (paddhati) on the worship of Tripurasundarī that includes both knowledge of ritual procedures, as well as esoteric contemplations (bhāvanā) on ritual action. The Jñānadīpavimarśinī survives in a Nepalese manuscript dated to 1382 and was edited and published by Ācārya Vrajavallabha Dwivedi in 1996. Concerning the identity of this Vidyānanda with the Vidyānanda of the famed Artharatnāvalī commentary on the Nityāṣoḍaśikārṇava tantra, Professor Sanderson notes, "The identity of this Vidyānanda with the author of the commentary is supported by the evidenced that the former shares the latter's Guru linage exactly, ending with Vāsudeva (The Guru of Śivānanda)."

